छित्वाभित्वाच भूतानि हत्वा सर्व्वमिदं जगत् ॥ यजेदेकं विरूपाक्षं नसपापै र्विलिप्यते ॥ ७८ ॥ विष्णुना रावणं हत्वा ससैन्यं ब्रह्मणः सुतम् ॥ स्थापितं विधिवद्भक्त्या लिङ्गं तीरे नदीपतेः ॥ ७९ ॥ कृत्वा पाप सहस्राणि हत्वा विप्रशतन्तथा ॥ ५ापात् समाश्रिते लिंमे मुच्यते नात्र संशयः ॥८०॥ विश्वेदेवाः समरुतः पशवः पक्षिणो मृगाः ॥ ब्रह्मादिस्थावरान्तं च सर्व्वं लिंगे प्रतिष्ठितम् ॥ ८१ ॥ तोड़ल तन्त्रे ॥ शैव वैष्ण वदौर्गार्क गाणपत्येन्द्र सम्भवाः ॥ आदौ शिवम्पूजयित्वा अन्यदेवं प्रपूजयेत् ॥८२॥ अन्यदेवम्पूजयित्वा

अथवा सब जगतको मार डाले परन्तु शिवका यजन (पूजन) करनेसे सब पाप छूट जाते हैं ॥७८॥ रामचन्द्रने ब्रह्माके सन्तान रावणको सैन्यके साथ मारा और ब्रह्म हत्या छूटनेके निमित्त समुद्रके तीरमें लिंग स्थापन की है ॥७९॥ जहारों पाप शैकड़ों ब्रह्महत्या छूट जाते हैं शिवलिंगके शरणागत होनेसे ॥८०॥ विश्वदेव वायु पशु पक्षी मृग आदि सब चराचर लिंगहीमें प्रतिष्ठित हैं ॥८१॥ तोड़ल तन्त्रमें लिखा है कि रुद्र भक्त, विष्णु भक्त, शक्ति भक्त, सूर्य भक्त, गणेश भक्त, इन्द्र भक्त, आदि सब देव भक्त प्रथम शिव पूजा करके बाद अपने इष्टदेवका पूजन करें ॥८२॥ अन्य देवोंका

शिवं पश्चाद्यजेद्यदि ॥ तस्य पूजाफलं व्यर्थं भुज्यते राक्षसैरिति ॥८३॥ स्कान्दे विष्णु वाक्यम् ॥ योम-हादेव मन्येन हीनदेवेन दुर्मतिः ॥ सकृत्साधारणं ब्रूते सोऽन्त्यजानां त्यजोऽन्त्यजः ॥ ८४ ॥ कर्ताऽहं सर्वलो-कानां ममकर्ता महेश्वरः ॥ तस्य देवाधिदेवस्य कर्ता कोपि न विद्यते ॥ ८५ ॥ सौर संहितायाम् ॥ सर्वान् देवान्परित्यज्य यजेत्पञ्चास्य मीश्वरम् ॥ सर्वान्मन्त्रा-न्परित्यज्य जपेत्पञ्चाक्षरीम्पराम् ॥ ८६ ॥ शिवमेकं परित्यज्य योऽन्यदेव मुपासते ॥ तृषितो जाह्नवीतीरे

पूजा करके जो पीछे शिवका पूजन करते हैं उनका पूजाका फल राक्षस सब खा जाते हैं ।।८३।। स्कन्द पुराणमें विष्णु भगवानका वचन है कि जो दुष्टबुद्धि पुरुष महादेवको हीन देवोंके बराबर एक बार भी कहते हैं वे चाण्डालोंके चाण्डाल हैं ।।८४।। सब जगतका कर्ता मैं हूँ और मेरा कर्ता महादेव हैं और उस देवाधिदेवका कर्ता कोई नहीं है ।।८५।। सौरसंहितामें लिखा है कि सब देवोंको छोड़कर पंचवक्त्र ईश्वरका पूजन करना और सब मन्त्रोंको छोड़कर मन्त्रा-धिराज राज पंचाक्षर (नमः शिवाय) का जप करना चाहिये ।८६। शिवको छोड़कर जो अन्य देवोंका उपासना करते हैं सो पीयासे

कूपं खनति दुर्मतिः ॥ ८७ ॥ तोड़ल तन्त्रे ॥ आदौ शिवम्पूजयित्वा शक्तिपूजा ततः परम् ॥ अन्यथा मूत्रवत्सर्वं गंगातोयम्भवेद्यदि ॥ ८८ ॥ कामदेवेन सर्वदेवसमं शिवं मत्वा भस्मसादभूव तदुक्तं शिवरहस्ये सप्तमांशे ॥ भालाक्षभालसम्भूतश्चित्रभानु र्भयङ्करः ॥ स पावकः समागत्य जज्वाल कुसुमायुधम् ॥८९॥ भस्मावशेषं कृत्वैव प्रशान्त स्तदनन्तरम् ॥ समन्मथ स्ततोनीत स्तदैव यमकिंकरैः ॥९०॥ पातितश्चाति घोरेषु नरकेषु प्रयत्नतः ॥ अतो नान्यसमं शम्भुं अन्यतुल्यतया भ्रमात् ॥ येऽभिजानन्ति दुर्वृत्ता स्तेषामेतादृशी

हुए गंगाके तीरमें कूँआँ खोदते हैं ॥८७॥ तोड़ल तन्त्रमें लिखा है कि पहले शिवका पूजन करके शक्तिकी पूजा करनी चाहिए अन्यथा गंगाजल भी मूत्रवत हो जाता है ॥८८॥ कामदेवने सब देवोंके सदृश शिवको समझा कि सबको अपने वसमें कर दिया तो शिवको भी कर दूँगा ऐसा समझकर शिवके समीप आया और उनको भी बस करना चाहा परन्तु शिवके तृतीय नेत्रके ज्वालासे भस्म हो गया सो लिखा है शिवरहस्य अंश सातमें लिखा है कि भालाक्ष (महादेव) के ललाटसे भयंकर अग्नि निकलकर कामदेवको बिल्कुल

गतिः ॥ ९१ ॥ महादेवोऽखिलाराध्यः सर्वदेव शिखा मणिः ॥ नततोस्त्यधिको विप्र नततुल्योऽथवा ध्रुवम् ॥ ॥९२॥ महादेवोत्तमं देवं अन्यान्येवै वदन्ति ते ॥ भूयो-भूयो मविष्यन्ति चाराडालाएव सर्वथा ॥९३॥ कः कृतान्त कृतान्तान्तं न चिन्तयति सन्ततम् ॥ पूतः स्वान्ते सम्वसन्तं नितान्तं श्रुति सम्वतम् ॥९४॥ अतः सन्तः सावधानाः सततं शान्तचेतना ॥ उमा-कान्तं प्रयत्नेन भजन्ति भवभीरवः ॥९५॥ शिवधर्मोप-

भस्म कर शान्त हुई और कामदेवको यमदूतोंने पकड़कर अति घोर नरकमें ले गये अतः शिवको जो भ्रममें पड़कर अन्य देवोंके सदृश जानते हैं उनकी ऐसा ही गति होती है ॥८९॥९०॥९१॥ सब देवोंका शिखामणि महादेव सर्वपूज्य हैं उनसे अधिक वा उनके बराबर दुसरा कोई देवता जगतमें नहीं है ॥९२॥ महादेवसे उत्तम जो अन्य देवोंको कहते हैं वे बार-बार चाराडाल योनिमें जन्म लेते हैं ॥९३॥ महादेव पवित्र हृदय पुरुषोंके अन्तःकरणमें रहते हैं ऐसा श्रुति कहती है और यमराजका भी नाश करनेवाले शिवका कौन अधम नहीं चिन्तन करेगा ? ॥९४॥ अतः संसारके बन्धन भयसे डरकर सन्तोने सावधान चित्तसे उमाकान्त शिवका भजन करते हैं ॥९५॥ शिवधर्म उपपुराणमें लिखा है कि महेश्वरका बनाया

पुराणे ॥ महेश्वर कृतं सर्वं त्रैलोक्यं सचराचरम् ॥ ते कृतघ्ना भविष्यन्ति येन भक्ता महेश्वरे ॥ ९६ ॥ सिद्धशंकर तन्त्रे प्रथम पटले ॥ वैद्यम्विना निरानन्दाः क्लिश्यन्ति रोगिणो यथा ॥ शिवम्विना निरानन्दं क्लिश्यन्तेहि जगत्तथा ॥९७॥ मातृकाभेदतन्त्रे प्रथम पटले ॥ त्रिपुरा परमाविद्या महाविद्या पतिव्रता ॥ पतिपूजां विनापूजा न गृह्णाति कदाचन ॥ ९८ ॥ शिवरहस्ये ॥ आदौलिंगं प्रपूज्येत विल्वपत्रैश्च नारद ॥ अन्यथा मूत्रवत्सर्वं शिवपूजां विना कृतम् ॥९९॥ व्यतिक्रमन्तु योमोहा दर्पाद्वापि समाचरेत् ॥ सोऽधः

चराचर सब जगत है वे कृतघ्न हैं जो शिवका भजन नहीं करते ।९६। सिद्धशंकर तन्त्रमें लिखा है कि वैद्यके विना जैसे निरानन्द हो रोगी क्लेशमें पड़े रहते हैं वैसे ही शिवके जानने विना यह जगत क्लेशमें पड़ा है ॥९७॥ मातृकाभेद तन्त्रके प्रथम पटलमें लिखा है कि त्रिपुरा (काली) महाविद्या पतिव्रता हैं पतिपूजाके विना पूजा नहीं ग्रहण करती हैं ॥९८॥ शिवरहस्यमें लिखा है कि पहले विल्वपत्रसे शिवलिंगका पूजन करके बाद और देवताओंका पूजन करना अन्यथा शिवपूजाके विना सब मूत्रवत् हो जाता है ॥९९॥ भूलसे अथवा अभिमानसे पहले जो दूसरे देवका पूजन करते हैं वे पापी नीचेको

पतति पापात्मा तस्यार्चा निष्फलाभवेत् ॥१००॥ तारानिगमे महाकालेकेश्वर तन्त्रेच॥ पार्थिवं नार्चयित्वा तु कालिं तारां च सुन्दरीम् ॥ अर्चयेद्यस्त्रिलोकस्थः स याति यमयातनाम् ॥१॥ त्रिपुरा कल्पेऽपि ॥ यावन्न पूजयेत् लिंगं पार्थिवं कामसाधकः ॥ तावत् पूजां नगृह्णाति सुन्दरी तारकासिता ॥२॥ सनत्कुमार संहितायाम्॥ अनभ्यर्च्य महादेवं योश्नाति फलमम्बु वा सप्राप्नोति मुहुर्जन्म क्षुद्र चाण्डाल योनिषु ॥३॥ पाद्मे ॥ यो न पूजयते लिंग ब्रह्मादीनां प्रकाशकम् ॥

जाते हैं और उनका पूजन निष्फल हो जाता है ॥१००॥ तारानिगममें और महालिंगेश्वर तन्त्रमें लिखा है कि पार्थिव लिंगको बिना पूजा किये जो काली, तारा, सुन्दरी, आदि देवियोंका पूजन करते हैं सो यमलोकको जाते ॥१॥ त्रिपुरा कल्पमें भी लिखा है कि पार्थीव लिंगका विना पूजाके सुन्दरी तारा काली आदि देवी पूजा नहीं ग्रहण करती हैं ॥२॥ सनत्कुमार संहितामें लिखा है कि विना शिवपूजा किये जो फल जल आदि खाते पीते हैं सो वार-वार चाण्डाल योनिमें जन्म लेते हैं ॥३॥ पद्मपुराणमें लिखा है ब्रह्मा आदि देवोंका प्रकाश करनेवाला शिवलिंग है उसका जो पूजन नहीं करते वे छः शास्त्र चारों वेदोंको जाननेवाले भी हो तो पशुके सदश

शास्त्रवि त्सर्ववेत्तापि चतुर्वेदी पशुस्तुसः ॥४॥ शिव-पूजार्थ मालस्यं यः करिष्यति मूढधीः ॥ सोष्णत्क्षीर स्विहायैव मूत्रं पिवति सर्वदा ॥५॥ ईशान संहिता-याम् ॥ यस्यनास्ति गृहे नित्यं शिवलिङ्गार्चनं शिवे ॥ तद्गृहं चराड चाण्डाल गृहमेव नसंशयः ॥६॥ शिवलिङ्गार्चनं यस्तु नकरिष्यति दुर्मतिः ॥ तत्स्पर्शे भानुमालोक्य सचैलं जल माविशेत् ॥७॥ शिवलिङ्गा-र्चने यस्य नास्ति साधारणा मतिः ॥ सचाण्डाल इतिज्ञेयः सर्वधर्म वहिष्कृतः ॥८॥ अत्यन्त दुलभं जन्म कलौ प्राप्यापि मानुषम् ॥ यदि नाराधये

हैं ॥४॥ जो मूढ़ शिव पूजामें आलश्य करता है सो गरम दूधको छोड़कर मूत्रको पीता है ॥५॥ ईसान संहितामें लिखा है कि जिसके गृहमें शिवपूजा न होती हो उसका गृह महा चाण्डालके गृहके सदृश है ॥६॥ जो दुष्टबुद्धि शिवलिंगका पूजन नहीं करते हैं उनसे छू जानेपर सचैल स्नानकर सूर्यका दर्शन करना चाहिये ॥७॥ शिव-लिंगके पूजनमें जिसकी सदा प्रीति न रहती हो सो चाण्डाल हैं और सब धर्म कर्मोंसे बाहर करने योग्य हैं ॥८॥ इस कलियुगमें अत्यन्त दुर्लभ मनुष्य जन्म पाकर यदि शिवका आराधन नहीं किया

च्छम्भु स्तस्य जन्म निरर्थकम् ॥९॥ लिंगपूजां विहा-
यैव भोक्तुमिच्छति योनरः ॥ तमानीयायसैर्दण्डै सन्ता-
पयति भास्करिः ॥१०॥ लैङ्गेऽपि ॥ लिङ्गपूजा म्वि-
हायैव यदिभुङ्क्ते भ्रमाद्द्विजः ॥ तदातदन्नं निष्कास्य
चरेच्चान्द्रायणाष्टकम् ॥११॥ लिंगार्चनं विहायैव
भुक्तमेतैर्दुरात्मभिः ॥ पश्यैता न्कृमिकुण्डस्थान् किमि-
भक्षण तत्परान् ॥१२॥ ब्रह्मोत्तरखण्डे ॥ वरम्प्राण
परित्यागः छेदनं शिरसोऽपिवा ॥ नत्वनभ्यर्च्य भुञ्जीया
द्भगवंतं सदाशिवम् ॥१३॥ वायुसंहितायाम् ॥

तो उसका जन्म व्यर्थ ही बीत गया ॥९॥ लिंगपूजा छोड़कर जो
भोजन करते हैं उनको यमराज तप्त लौह दण्डसे खातिरदारी करते
हैं ॥११०॥ लिंग पुराणमें लिखा है कि शिवलिंग पूजा भ्रमसे भी
यदि एक दिन छूट जाय और भोजन करले तो उस अन्नको वमनकर
आठ चान्द्रायण व्रत करनेसे शुद्ध होता है ॥११॥ लिंगपूजा छोड़कर
भोजन करनेवाले दुरात्मा पुरुष क्रिमिकुण्डमें क्रिमी भक्षण करते हैं
॥१२॥ ब्रह्मोत्तरखण्डमें लिखा है कि प्राण त्याग कर देना श्रेष्ठ है
शिर काट देना उत्तम है परन्तु विना शिवपूजा किये भोजन करना
अच्छा नहीं है ॥१३॥ वायुसंहितामें लिखा है कि जब तक शरीरमें

असम्पूज्य नभुञ्जीत शिवमाप्राण सञ्चरात् ॥ यदि पापेन भुञ्जीत्त स्वैरं तस्य ननिष्कृतिः ॥१४॥ प्रमादेन-तु भुञ्जीत तुदुग्दीर्य्यं प्रयत्नतः ॥ स्नात्वा द्विगुणमभ्य-र्च्यं देवं देवी मुपोष्यच ॥१५॥ मातुर्विक्रयणं शस्तं शिरसोवाऽपि कर्तनम् ॥ नचैवापूज्य भुञ्जीत शिवलिंगे महेश्वरम् ॥१६॥ स्कान्दे प्रभासखण्डे दशमाध्याये ॥ सशिवः परमं शैव्यो अनादिनिधनो विभुः ॥ तस्मा-त्परतरं नास्ति सर्वशास्त्रा गमेषुच ॥ सिद्धान्तागम वेदान्त दर्शनेषु विशेषतः ॥१७॥ कौर्म्मेऽपि ॥ नार्च-

प्राण चलता रहे तब तक विना शिवपूजन किये भोजन नहीं करना यदि पापबुद्धि होकर भोजन कर ले तो उसका उद्धार नहीं होता ॥१४॥ भूलसे यदि भोजन कर ले तो उस अन्नको वमनकर स्नानकर शिव भगवतीका द्विगुण पूजन कर उस दिन उपवास करनेसे शुद्ध होता है ॥१५॥ माताको विक्रय करना शिर काटना श्रेष्ठ है परन्तु विना पूजन किये भोजन करना ठीक नहीं है ॥१६॥ स्कन्दपुराण प्रभास-खण्डके अध्याय दशमें लिखा है कि वही परम शिव अनादि नाश-रहित सदाशैव्य हैं उनसे परें सब शास्त्र आगम (तन्त्र) वेदवेदान्त आदि दर्शनोंमें कोई दूसरा नहीं है ॥१७॥ कूर्मपुराणमें भी लिखा है कि देवताओंसे वन्दित शिवका जो पूजन नहीं करते उनका ज्ञान

यन्तिच येरुद्रं शिवं त्रिदश वन्दितम् ॥ तेषां ज्ञानं तपो मोक्षो वृथा जीवित मेवच ॥१८॥ योमोहा दथवालोभाद् कृत्वा शिवपूजनम् ॥ भुंक्ते सयाति नरकं चान्तेशूकरताम्व्रजेत् ॥१६॥ शिवरहस्ये सप्तमांशे ॥ व्यापारान्सकलान्त्यक्त्वा पूजध्वं सदाशिवम् ॥ शिव धर्मपरोभूत्वा यावज्जीवं प्रतिज्ञया ॥२०॥ अर्चयेत्तं महादेव मापन्नोपि सदाबुधः ॥ पत्र पुष्पादिभि र्नित्यं चिरं वेदोक्त वर्त्मना ॥२१॥ शिवलिङ्ग मनभ्यर्च्य योभुक्ते मोहसंगतः ॥ सयाति नरकं घोरं यावदाचन्द्र तारकम् ॥२२॥ शिवलिङ्गार्चनं कार्य्यं

तप मोक्ष जीवन व्यर्थ है ॥१८॥ जो पुरुष भूलसे अथवा लोभसे शिवपूजा विना किये भोजन करते हैं वे नरकको जाते हैं अन्तमें शूकर योनिमें जन्म लेते हैं ॥१६॥ शिवरहस्यके अंश सातमें लिखा है कि सव कामोंको छोड़कर शिवभक्त होकर यावज्जीवन पर्यन्त शिव पूजन करो ॥१२०॥ मरणापन्न होनेपर भी वेदोक्त मार्गमें होकर पत्रपुष्पादि सामग्रियोंसे शिवपूजाको मत त्याग करो ॥२१॥ शिवलिंगका विना पूजन किये जो मोहवस भोजन करते हैं वे जब तक चन्द्र सूर्य आकाशमें रहते हैं तब तक घोर नरकमें रहते हैं ॥२२॥

त्यक्त्वा कार्य्यं मशेषतः॥ यदि त्यजति मोहेन प्रत्यवैति नसंशयः ॥२३॥ पुनस्तत्रैव विष्णुवाक्यम्॥ यः शंकरं विहायान्यं सुरेमर्चितु मिच्छति ॥ सपरित्यज्य विप्रत्वं चाण्डाल त्वञ्च गच्छति ॥२४॥ सर्वोत्तमं महादेवं विदित्वा योर्चयिष्यति ॥ नमस्तस्मै नमस्तस्मै नमस्तस्मै नमोनमः ॥२५॥ मुग्धेन्दु करुणा तरणिम्विहाय खद्योतव द्विधिहरीन्द्र मुखान्सुरांश्च ॥ सेवन्ति गाढतमसैक विनाश हेतून् मूढाहिते दृढतरा मृड़भक्ति हीनाः ॥२६॥ वृहज्जावालोपनिषदि ॥ तदनभ्यर्च्यना श्नीयात्फलम-

अतः सब कामोंको छोड़कर शिवका पूजन करना चाहिये मोहवश त्याग करनेसे पापी होता है ॥२३॥ पुनः वहाँ ही विष्णु भगवानका वचन है कि जो महादेवको छोड़कर अन्य देवोंका पूजनका इच्छा करते हैं सो ब्रह्मणत्वसे च्युत होकर चाण्डालत्वको प्राप्त होते हैं ॥२४॥ सर्वोत्तम महादेव हैं ऐसा समझकर जो शिवका पूजन करते हैं उनको बार-बार मैं नमस्कार करता हूँ ॥२५॥ चन्द्रशेखर करुणानिधिरूपी नौकाको छोड़कर घोर अन्धकार दूर करनेके लिये जो पुरुष खद्योतवत (भगजोगनीके सदृश) ब्रह्मा हरि इन्द्र आदि देवोंका उपासना करते हैं वे मूढ़ शिवभक्तिसे हीन हैं ॥२६॥ वृहज्जावाल उपनिषदमें लिखा है कि विना शिवका पूजन किये

न्नमन्य द्वा यदश्नीयात् तत्तुरेतो भद्मी भवेत् ॥ नापः पिवेत् यूयपो भवेत् प्रमादेनैकदा अनभ्यर्च्य भुक्त्वा भोजयित्वा वा केशान्वापयित्वा पञ्चगव्यान् संगृह्यो पोष्य जले रुद्रस्थाने वा जपेत् त्रिवारं शतरुद्रीयमादित्यं पश्य नभिध्यायन् स्वकृतं कर्म्मततो रौद्रैर्मन्त्रै र्मार्जिनं कुर्य्या त्ततो भोजयित्वा ब्राह्मणान् पूतो भवति ॥२७॥ भस्म जावालोपनिषदि ॥ अहरहरभ्यर्च्य विश्वेरलिङ्गं तत्र रुद्रसूक्तै रभिषिञ्च्य तदेवस्नपनं पयः स्त्रिः पीत्वा महापातकेभ्यो विमुच्येत ॥ २८ ॥ अथर्व वेदे का० ११ अनु० ४ सूक्त १० मं० ॥१७॥

भोजन वीर्यके सदृश जल पीवके समान है भूलसे एक दफे भी भोजन कर ले तो केशोंको मुड़ाकर पंचगव्य पीये और रूद्रस्थानमें अथवा जलमें खड़ा होकर उपवाशकर तीन बार शतरूद्री मन्त्रोंका जप कर सूर्यमुख होकर अपने निन्दित कर्मोंका ध्यान कर रूद्रमन्त्रोंसे मार्जन कर ब्रह्मणोंको भोजन करानेसे शुद्ध होता है ॥२७॥ भस्मजावाल उपनिषदमें लिखा है कि विश्वेश्वर लिंगको रूद्र सूक्तसे नित्यनित्य अभिषिंचनकर उस जलको तीन दफे पीनेसे महापातक छूट जाते हैं ॥२८॥ अथर्व वेद काएड एग्गारहमें लिखा है कि ईश

सर्वे देवा उपाशिक्षन् तदजानाद्वधूः सती ईशावशस्य जाया सास्मिन् वरणमाभरत् ॥ २६ ॥ यजुर्वेदे तृतीयाध्याये मन्त्र ॥६०॥ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम् ॥ उर्वारुक मिवबन्धनान् मृत्योर्मुक्षीयमामृतात् ॥ ३०॥ कृष्ण यजुर्वेद अनुवादक ॥१६॥ मन्त्र

(शिव) में ये सब जगत है जो सबको पालन करते हैं और उनका सब देवतागण उपासना करते हैं ॥२६॥

अस्य मन्त्रस्य सायणकृत भाष्ये ॥ पार्वतीपते त्वां यजामहे पूजयामः इत्यादि ॥ महीधर भाष्ये ॥ त्र्यम्बकं त्रिनेत्रोपेतं रूद्रं यजामहे पूजयामः इत्यादि ॥ ऋग्वेद भाष्ये ॥ ब्रह्म विष्णु रूद्राणा मम्बकं पितरं सदाशिवं यजामहे पूजयामः इत्यादि ॥ तथा श्रीमद्योगिवर्य विप्र राजेन्द्रेणापि रौद्रकल्प भाष्ये ॥ तत्रतावत्प्रति वक्त्राणित्रीण्यम्बकानि नेत्राणि यस्य तं सदाशिवं यजामहे तथा कथम्भूतं शोभना गन्धा यशांसि यस्य तमित्यर्थः एवमिहामुत्रकैवल्यफलै र्जगतां पुष्टिवर्द्धन मित्यर्थः ॥ उवारुकमिति ॥ तत्रताव द्यथोर्वारुकं कर्कटीफलं परिपक्वो त्तरं स्वयमेव त्यजति तद्वद्धे शिव ममापीह सर्वाभीष्टं प्रदर्श्य मृत्यो र्जन्ममरणादिबन्धना न्मुक्षीय मानत्वमृतादित्यर्थः ॥१३०॥

भाषार्थः

तीन नेत्रवाले अथवा ब्रह्मा, विष्णु, रूद्र, तीनोंका अम्बक (पिता) उनका मैं पूजन करता हूँ जो हमको इस मृत्युरूपी संसारसे ककरीके फलके सदृश अनायास मुक्त कर दें ॥१३०॥

१६।। सुवर्णलिङ्गाय नमः जललिङ्गाय नमः शिव-लिंगाय नमः स्थापयति पाणिमन्तं पवित्रम् ।। ३१ ।। शुक्ल यजुर्वेदे षोड़शाध्याये मन्त्र ।। ४९ ।। यातेरुद्र शिवातनूः शिवाविश्वाहा भेषजी तया नो मृड़ जीवसे ।।३२।। तत्रैव मन्त्र २।। याते रुद्रशिवातनू रघोरा

सायणकृत भाष्यम्

कनकनिर्मित लिङ्गाकाराय सुवर्णादि लिङ्गाय भूलोके विद्यमान द्वादश ज्योतिर्लिङ्गाय पूज्यमान शिलामयादि लिंगाकाराय नमः शिव-लिंग पूजनस्य कल्याणकारित्वत् ।।३१।।

भाषार्थः

कृष्णायजुर्वेद अनुवाक १६ मन्त्र १६ में लिखा है कि सुवर्ण आदि धातुओंका लिंग जल आदि पंचतत्वोंका लिंग जो पृथ्वीपर द्वादश ज्योतिर्लिंगरूपसे वर्तमान हैं उनको नमस्कार करता हूँ क्योंकि उसके पूजनसे कल्याण होता है ।।३१।।

भाष्यम्

हे रूद्र ! यातेतव ईदृशी तनूः शरीरं तया तन्वानोऽस्मान् जीवसे जीवितुं मृड़य सुखय कीदृशी शिवा शान्ता अघोरा विश्वानिच तान्यहानिच विश्वाहा कालाध्वनोरत्यन्तसंयोगेति, सूत्रेण द्वितीया तस्या आकारः सर्वेष्वहस्सु सर्वदा शिवा कल्याणकारिणी भेषजी औषधरूपा संसारव्याधि निवृत्तिका रूतस्य शरीरव्याधेः शिवा समी-चीना भेषजी निवर्तिकौषधि ।।३२।।

पापकाशिनी ॥ तयानस्तन्वा शन्तमया गिरीशन्ता भिचाकशीहि ॥ ३२ ॥ अथर्व वेदे दशमखराडे आवाहन मन्त्रः ॥ एह्यस्मान मातिष्ठ अस्मा भवतु ते तनू,

भाषार्थः

शुक्ल यजुर्वेदके अध्याय सोलहमें लिखा है कि हे रूद्र ? जो आपका कल्याणरूप शरीर उससे हम सबोंको सुख दीजिए वह आपका शरीर संसाररूप रोगका परम औषध है ॥३२॥

भाष्यम्

हे रुद्र ? यातेतव इदृशी तनूः शरीरं हे गिरिशन्त ? तया तन्वा नोऽस्मान् अभिचाकशीहि अभिपश्य 'चाकशीति पश्यतिकर्मा, निघण्टुः ३-११-८॥ कीदृशी तव कः शिवा शान्ता मंगलरूपा यतो अघोरा अविषमा सौम्या अतएव आपापकाशिनी अपापं सुखं काशयति प्रकाशयति अपापकाशिनी नपाप काशिनी पुण्यफलमेव ददाति न पापफलमित्यर्थः गिरौ कैलाशेस्थितः सं सुखं प्राणिनां तनोतिविस्तारयति गिरिशन्त इत्यादि ॥३३॥

भाषार्थः

यजुर्वेद अध्याय दूसरेमें लिखा है कि हे रुद्र ? कल्याणरूप जो आपका शरीर पुनः शान्तरूप जो आप हैं हे कैलाशवासी ? उस देहसे हम सबोंको देखिये जिससे हम लोगोंका कल्याण हो ॥३३॥ अथर्व वेद खगड १० मन्त्र १० में लिखा है कि हे परमेश्वर ? आप यहाँ आइये इस पत्थरके मूर्तिमें बैठिये यह पत्थरकी मूर्ति

॥ ३४ ॥ तत्रैव खं १३-मं० ४ ॥ मुखायते पशुपते यानि चक्षुंषिते त्वचेरूपाय संदृशे प्रतीचीनायते नमः ॥ अङ्गेभ्यस्ते उदराय जिह्वायास्यायते यद्भ्यो गन्धायते नमः ॥३५॥ यजुर्वेदे षष्ठाध्याये ॥ अर्चन्त अर्चन्त प्रियमेधसो अर्चन्त अर्चन्तु पुत्रका उत्पुरं न धृष्णं वर्चत ॥ ३६ ॥ तत्रैव ॥ १३-४ ॥ हिरण्यगर्भंछं समवर्तताग्रे भूतस्य जातः पतिरेष आसीत् सदाधारं पृथिविं द्यावा मुते मांकस्मै देवाय हविषा विधेम ॥३७॥

आपका शरीर हो जाय ॥३४॥ पुनः वहाँ हीं खण्ड १३ मन्त्र ४ में लिखा है कि पशुपति ? रुद्र देव तेरे मुखको नमस्कार है हे भव ? महादेवजी तेरे तीनों नेत्रोंको नमस्कार है और आपकी त्वचाको नमस्कार है प्रातीचीन जो आप हैं सो आपके उदर जिह्वा नासिका-को नमस्कार है ॥३५॥ यजुर्वेदके अध्याय छः में लिखा है कि हे अध्वर्जु आदि जनों ? तुम उस परमात्मा इन्द्रका पूजन करो हे प्रियमेधस ? तुम पूजन करो हे पुत्रों ? तुम पूजन करो जैसे घर्षण पुरुषको पूजते हो ॥३६॥ पुनः वहाँ हीं खण्ड १३ मन्त्र चारमें लिखा है कि जो हिरण्य गर्भ नामक ईश्वर (शिव) सबसे प्रथम शरीरधारी होकर भूत (जीव) मात्रका स्वामी हुआ और जो द्यौसे दिवलोक तथा इस पृथ्वीको सदा धारण करता है उस प्रजापतिको

नमः सायं नमः प्रातर्नमोरात्र्यां नमो दिवा भवाय च सर्वाय चोभाभ्या मकरन्नमः ॥ ३८ ॥ मनुस्मृतौ पञ्चमाध्याये ॥ नित्यंस्नात्वा शुचिः कुर्य्या द्देवर्षि पितृतर्पणम् ॥ देवता भ्यर्चन ञ्चैव समिदाधानमेव च ॥ ३९ ॥ महाभारते जैमिनियांश्वमेध पर्वणि भीम-

हवि देते हैं ॥३७॥ पुनः वहाँ हीं लिखा है कि हे रुद्र ! आपको सायंप्रातः और रात्रिमें दिनमें मैं भवदेव तथा रुद्रदेव दोनोंको नमस्कार करता हूँ ॥३८॥

अस्यार्थस्तु गोविन्दराजेनोक्तम् ॥ देवानां हरिहरादीनां पुष्पादिभि रर्चन मिति ॥ प्रतिमाना मेतत्पूजन मिति मेधातिथिः ॥ (देवशब्दः पिनाकीति निघण्टुः) देवार्चनं पुष्पाद्यैरिति सर्वज्ञनारायणः ॥ प्रतिमादिषु हरिहरादिदेवपूजन मितिकुल्लूभटः ॥

भाषार्थः

मनुस्मृतिके अध्याय पाँचमें लिखा है कि नित्यस्नानकर पवित्र होकर देव, ऋषि, पितृ, तर्पण करना और देवपूजन अग्निहोत्र करना इसका अर्थ गोविन्दराजने किया है कि फुलमालाओंसे शिव विष्णु आदि देवोंका पूजन करना ॥ मेधातिथिने लिखा है कि देवताकी प्रतिमा पूजन करना ॥ सर्वज्ञनारायणने लिखा है कि देवशब्द पिनाकी (शिव) को कहता है ऐसा निघंटुका वचन है अतः शिवपूजन करना ॥ कुल्लू भट्टने लिखा है कि मूर्तिमें शिव विष्णु आदि देवोंका पूजन करना ॥३९॥ महाभारत आश्वमेधीय पर्वके अध्याय दोमें

प्रतिज्ञा वाक्यम् ॥ एककूपोदकग्रामे ये वसन्ति द्विजा-
तयः ॥ नवेदाध्ययन यत्र न तथा शिवपूजनम्
॥१४०॥ क्षणमात्रन्तु तद्ग्रामे वसतां यागतिर्भवेत् ॥
सा गतिः प्राप्नुयान्मह्यं यदि चाश्वं नचानये ॥४१॥
ब्रह्मवैवर्ते केदारखण्डे ॥ द्विजो वा द्विजनारीवा त्यक्त्वा
शंकर पूजनम् ॥ यदि भुंक्ते तदायोनिं चाण्डालिं
प्राप्यते ध्रुवम् ॥४२॥ पुनस्तत्रैव ॥ शिव वाक्यम् ॥
मन्माया मोहिताः सर्वे ममभाया दुरत्यया ब्रह्म विष्णु
मुखा देवा मामाराध्य पदेस्थिता ॥४३॥ मां न जानाति

भीमका प्रतिज्ञा वचन है कि एक कूपवाले ग्राममें जो द्विजाति रहते
हों और शिवपूजा वेदाध्ययन न होता हो उस ग्राममें क्षणमात्र रहनेसे
जो पाप हो वह पाप हमको लगे यदि अश्व न ले आउँ तो ॥१४०-
४१॥ ब्रह्मवैवर्तके केदारखण्डमें लिखा है कि द्विज अथवा द्विजकी
स्त्री दोनों विना पूजन किये भोजन करते हैं तो चाण्डाल योनिमें
जाते हैं ॥४२॥ पुनः वहाँ ही शिवका वचन है कि ब्रह्मा विष्णु
आदि देवता हमारा पूजन करते हैं परन्तु हमारे मायासे मोहित होकर
हमको ब्रह्मरूप नहीं जानते हैं अतः ब्रह्म विष्णवादि पद भोगके
अन्तमें जन्मभागी होते हैं और जो ब्रह्मरूप जानते हैं सो हमारे ही

तत्वेन ज्ञाते मुक्ता भवन्ति ते ॥ न ज्ञाते मयिभो-
गान्ते जन्मभाजः पुनर्ध्रुवम् ॥४४॥ स्कान्दे शिवरहस्ये
ऽपि ॥ जनना सौचमध्येपि कर्तव्यं शिवपूजनम् ॥ शा-
वासौचेऽपि कर्तव्यं विना स्पर्शं प्रयत्नतः ॥४५॥ प्रशवो
जायते यस्या तयातु शिवपूजनम् ॥ कर्तव्यं मानसं
नित्यं दशाहान्तं यथाक्रमम् ॥ ४६ ॥ श्रौते कर्मणि
नाशौचं अश्रौते च क्वचिद्भवेत् ॥ श्रौतकर्म परित्या-
गः सूतकेऽपि न सर्वथा ॥४७॥ दर्शस्य पौर्णमासस्य
शिवलिंगार्चनस्य च ॥ प्रमादात्सूतकेत्यागान्नरकं प्रति

में लीन हो जाते हैं पुनः जन्म नहीं लेते हैं ॥४३॥४४॥ स्कन्द
पुराण तथा शिवरहस्यमें भी लिखा है कि जिसका नित्यनियम है कि
विना पूजन किये जल नहीं पीना उसको जननाशौच मरणाशौच
दोनोमें शिवपूजन करना परन्तु मरणाशौचमें बिना छूये उपर ही
उपर सब वस्तु चढ़ाना ॥४५॥ और जिस स्त्रीको लड़का हुआ हो
अथवा जो दाह कर्म किया हो उसको दश दिन तक मानस पूजा
करना चाहिये ॥४६॥ वेदविहित कर्ममें अशौच नहीं है अवैदिक
कर्ममें अशौच है अतः वैदिक कर्म अशौचमें भी नहीं त्याग करना
॥४७॥ दर्शयाग, पौर्णमासयाग, शिवलिंगार्चनको प्रमादवश जो

पद्यते ॥४८॥ यावज्जीवं श्रुतिस्तत्र प्रबलातन्न सूतकम् ॥ तिरस्कृतं भावनापि तन्न गृह्णाति सूतकम् ॥ ४९ ॥ मन्त्रमहोदधौ ॥ लक्षपार्थिवलिंगानां पूजना भुक्ति-मुक्तिभाक् ॥ लक्षन्तु गुड़लिंगानां पूजना त्पार्थिवो भवेत् ॥५०॥ नवनीतस्य लिंगानि सम्पूज्येष्ट मवा-प्नुयात् ॥ भस्मना गोमयेनापि वालुकाया स्तथा फलम् ॥५१॥ योलिंगं पूज्येन्नित्यं शिवभक्ति परा-यणः ॥ मेरुतुल्योपि तस्याशुः पापराशि र्लयंब्रजेत् ॥५२॥ दोग्ध्रीणान्तु गवांलक्षं योदद्या द्वेदपाठिने ॥

सूतकमें त्याग करते हैं वे नरकगामी होते हैं ॥४८॥ यावज्जीवन पर्यन्त शिवपूजन करना यह श्रुति कहती है तो इसके बीचमें सूतक आना असम्भव है ॥४९॥ मन्त्रमहोदधिमें लिखा है कि एक लक्ष पार्थिव लिंग पूजनसे भोग मोक्ष दोनों प्राप्त होता है और एक लक्ष गुड़का लिंग पूजनेसे राजा होता है ॥१५०॥ और मखन, भस्म, गोगर, बालुका, लिंग बनाकर पूजनेसे अभीष्ट सिद्धि होती है ॥५१॥ जो पुरुष नित्यनियमसे शिवपूजन करते हैं उनके सुमेरु सदृश पापोंकी राशि नष्ट हो जाती है ॥५२॥ वेदपाठी ब्राह्मणको एक लक्ष दुग्धवती गौ देनेवाला और पार्थिव लिंग पूजन करनेवाला दोनोंमें लिंगार्चन

पार्थीवं योर्चयेल्लिङ्गं तयोर्लिंगार्चको वरः ॥५३॥ पद्मपुराणे उत्तरखण्डे ॥ सकृल्लिङ्गं समभ्यर्च्य शालग्रामशिलाञ्चयः ॥ पीठे संस्थापयित्वातु श्राद्धं यः कुरुते नरः ॥ पितरस्तस्य तिष्ठन्ति कल्पकोटि शतं दिवि ॥५४॥ शंकर संहितायाम् ॥ यो हस्तपीठे निजमिष्ट लिंगं विन्यस्य तल्लीनमन प्रचारः ॥ वाह्यक्रिया संकुलनिस्पृहात्मा सम्पूजयत्यङ्ग स वीर शैवः ॥५५॥ तदेव हस्ताम्बुज पीठमध्ये निधाय लिंगं परमात्म चिह्नम् ॥ प्रपूजये दैक्य धियोपचारैः नरस्तु वाह्यान्तर भेदभिन्नैः ॥ ५६ ॥ निर्णयसिन्धौ भविष्य

करनेवाला पुरुष श्रेष्ठ है ॥५३॥ पद्मपुराणके उत्तरखण्डमें लिखा है कि एक बार भी शिवलिंग अथवा शालग्रामका पूजन करके और उनको सिंहासनमें रखकर पितृ श्राद्ध जो करते हैं उनके पितर कोटि कल्प तक तृप्त रहते हैं ॥५५॥ शंकर संहितामें लिखा है कि जो पुरुष अपने हाथपर शिवलिंगको रखकर बाह्यवृत्तिको छोड़कर उन्हींमें लीन हो पूजन करते हैं सो वीरशैव हैं ॥५५॥ कमलके सदृश हाथ पर परमात्मा (शिव) का चिह्न (लिंग) को रखकर अपनेसे शिवसे अभेद मानकर पूजन करना चाहिये ॥५६॥ निर्णयसिन्धु धर्मशास्त्रमें भविष्यपुराणका वचन लि० कि मृत्तिका, गोवर, भस्म, आटा, तामाँ,

वचनम् ॥ मृद्भस्म गोशकृत्पिष्ट ताम्र कांस्य मयं तथा ॥ कृत्वा लिंगं सकृत्पूज्य वसेत् कल्पायुतं दिवि ॥५७॥ आयुष्मान् वलवान् श्रीमान् पुत्रवान्धनवान्सुखी ॥ वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ॥५८॥ गो भू हिरण्य वस्त्रादि वलि पुष्पं दिने दिने ॥ ज्ञेयो नमः शिवायेति मन्त्रः सर्वार्थ साधकः ॥ सर्वमन्त्राधिक श्चाय मोंकाराद्यः षडक्षरः ॥५९॥ तत्रैव शूलपाणि वचनम् ॥ सूतके मृत्तिके चापि नत्याज्यं शिवपूजनम् ॥ शिवपुराण वचनम् ॥ पूजयित्वा महादेवं पितृश्राद्धं प्रकल्पयेत् ॥१६०॥ तत्रैव माधवीय

काँस, आदि धातुओंका लिंग बनाकर जो पूजन करते हैं सो अयुत (दश हजार) वर्ष स्वर्गमें रहते हैं ॥५७॥ वहाँ ही नन्दीश्वरोप पुराणका वचन है कि जो पार्थिव लिंगका अर्चन करते हैं सो आयुष्मान् वलवान् लक्ष्मीवान् पुत्रवान् सुखी होते हैं ॥५८॥ गौ, भूमी, सुवर्ण, वस्त्र, वलि, पुष्प, आदि सब वस्तु ॐ नमः शिवाय, इस मन्त्रसे अर्पण करनेसे सब मनोरथ सिद्ध होते हैं ॐकारयुक्त पंचाक्षर षड्क्षर होता है यह षड्क्षर मन्त्र सब मन्त्रोंसे श्रेष्ठ है ॥५९ पुनः वहाँ ही शूलपाणिका वचन है कि सूतक (जन्माशौच) मृतक (मरणाशौच) दोनोंमें शिवपूजा नहीं त्याग करना और शिवका

वचनम् ॥ न पूजयति देवेशं रुद्रं त्रिभुवनेश्वरम् ॥ जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः ॥ ६१ ॥ वर्षे-वर्षे महादेवि नरो नारी पतिव्रता ॥ शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेत् ॥६२॥ माघमासस्य शेषेया प्रथमा फाल्गुनस्य च ॥ कृष्णा चतुर्दशी सातु शिवरात्रिः प्रकीर्तिता ॥६३॥ यानि कान्यत्र लिङ्गानि स्थावराणि चराणि च ॥ तेषु संक्रमतेदेवस्तस्यांरात्रौ यतो हरः ॥ शिवरात्रिस्तु साख्याता तेनसा हरवल्लभा ॥६४॥ स्कान्दे कालिका खण्डे व्यासम्प्रति श्रीशंकर वाक्यम् ॥ पश्यमल्लिङ्ग मुत्कृष्टं सर्वेषां पूज्यमेव हि ॥

पूजन करके पितृ श्राद्ध करना ॥१६०॥ पुनः वहाँ ही माधवीयका वचन है कि तीनों लोकका ईश्वर देव-देव शिवका जो पूजन नहीं करते हैं सो हजारों जन्म भ्रमते हैं ॥६१॥ वर्ष-वर्षमें नर नारी पतिव्रता भक्तिपूर्वक शिवरात्रिको पूजन करें ॥६२॥ माघका शुल्कपक्ष फाल्गुनका कृष्णपक्ष माघ है उसमें कृष्णपक्षकी चतुर्दशी शिवरात्रि है ॥६३॥ इस पृथ्वीपर जो चल अचल और संस्कार किया अथवा बिना संस्कार किया लिंग वर्तमान हैं उन सब लिंगोंमें महा शिवरात्रिके रात्रिमें शिव साक्षातरूपसे रहते हैं अतः शिवरात्रि उसका नाम है ॥६४॥ स्कन्दपुराणके कालिका खण्डमें व्यासके प्रति

विष्णु ब्रह्मादिकान्देवान्पश्यमल्लिङ्ग पूजकान् ॥६५॥ मानिन्दयस्व मद्भक्ता न्भस्मरुद्राक्ष एव च ॥ मदुत्कर्षोहि सर्वेषु पुराणेषु प्रदर्शय ॥६६॥ शिवरहस्ये आख्यायिका मप्याह ॥ आर्य्यावर्ते द्विजः कश्चिद्ब्राह्मणोवेद वित्तमः ॥ सर्वसौभाग्य सम्पन्नः सर्व-शास्त्र विशारदः ॥६७॥ कदाचित्क्षुधितः श्रान्तो-विस्मृत्य शिवपूजनम् ॥ चकार भोजनमतः प्रदोषे वालवद्वली ॥६८॥ ततः सदैवयोन पञ्चत्व मगमद्द्वि-जः ॥ ततो यमभटैर्नीतः शूलैः संताडितस्तदा ॥६९॥ यमदूता उचुः ॥ यमायं ब्राह्मणः पूर्वं विहाय शिव

शंकरजीका वचन है कि हमारे उत्तम लिंगको देखो जो सबसे पूज्य है और हमारे लिंगपूजक ब्रह्मा विष्णु आदि देवोंको देखो हमारे भक्तका भस्म रुद्राक्षका निन्दा मत करो हमारा श्रेष्ठता सब पुराणोमें कहो ॥६५॥ शिवरहस्यमें एक कथा लिखी है कि आर्यावर्त देशमें सब शास्त्रोंका पंडित सौभाग्ययुक्त एक ब्राह्मण रहा ॥६७॥ एक समय क्षुधासे पीड़ित हो प्रदोषकालमें बालकके सदृश बिना पूजन किये भोजन कर लिया ॥६८॥ वाद कुछ दिनके मरनेपर यमदूतोंने शूलसे ताड़ना करते हुए यमके पास ले जाकर बोले कि ॥६९॥ हे यम ! यह ब्राह्मण एक दिन बिना पूजन किये भोजन किया ॥७०॥

पूजनम् ॥ उवासैक दिनं मत्तः शंकरं स्मरणम्बिना ॥ ॥७०॥ अनेन भुक्तं मत्तेन श्रान्तेन क्षुधितेन च ॥ शिवाय नार्पितं दिव्यमन्नं स्वप्रिय मादरात् ॥ ७१ ॥ कियत्पर्यन्तमेतस्य नरके वसतिर्मता ॥ कीदृशे नरके यो ज्यो वद सर्वमशेषतः ॥ ७२ ॥ इति तेषां वचः श्रुत्वा विचार्य बहुधा यमः ॥ धर्मशास्त्रा विरोधेन वचः प्राह विचक्षणः ॥७३॥ पञ्चवत्सर पर्य्यन्तं तप्त-तैले निरन्तरम् ॥ तिष्ठत्वयं ततो भूमौ स्वयमेव पतित्यति ॥ ७४ ॥ शिवरहस्ये सप्तमांशे ऋषिन् प्रति व्यास वाक्यम् ॥ अर्चयध्वं महादेवं विष्णु ब्रह्मादि वन्दितम् ॥ त्रिकालमप्रमादेन विल्वपत्रादि साधनैः

इसने क्षुधासे पीड़ित होकर शिवको बिना अर्पण किये ही भोजन किया है ॥७१॥ किस नरकमें कितना दिन तक रहेगा सो कहिए ॥७२॥ ऐसा दूतोंका वचन सुन धर्मशास्त्रसे बहुत विचारकर यमराज बोले कि पाँच वर्ष तक तप्त तैलकुण्डमें रहकर पीछे स्वयं पृथ्वीपर जन्म लेगा ॥७३॥७४॥ शिवरहस्य अंश सातमें ऋषियोंके प्रति व्यासजीका वचन है कि ब्रह्मा, विष्णु आदि देवोंसे बन्दित शिवको त्रिकाल बिल्वपत्रसे पूजन करो ॥ और उनका भजन करो पञ्चाक्षर

॥ ७५ ॥ भजध्वमप्रसादेन शिवं ब्रह्मादि वन्दितम् ॥ जयध्व मनिशं यत्ना च्छिव पञ्चाक्षरं परम् ॥ ७६ ॥ उद्धूलनं त्रिपुंड्रंच तथा रुद्राक्ष धारणम् ॥ मात्यजध्वं मात्यजध्वं निद्राकालेऽपि सर्वथा ॥७७॥ स्कान्दे ऋषिन् प्रति व्यास वाक्यम् ॥ शिवएव स्वयं लिङ्गं लिङ्गं गमक एवहि ॥ शिवेन गम्यते सर्वं शिवो नान्येन गम्यते ॥ ७८ ॥ जडंहि गम्यतेऽन्येन नाजडं मुनि पुङ्गवाः ॥ शिवोनैव जडः साक्षात् स्वप्रकाशैक लक्षणः ॥ ७९ ॥ शिरोहि मन्दिरम्प्रोक्तं जिह्वोपरियतः शिवः ॥ रन्ध्राज्जलामृतैः सिंचन् जिह्वा घंटाध्वनि निर्य्यतः ॥ ८० ॥ स्कन्दौ पीठं भवेतत्राप्याधारं नाभि

मन्त्रका अहर्निश जप करो ॥७५॥७६॥ उद्धूलन त्रिपुंड्र रुद्राक्ष धारण शयन कालमें भी मत त्याग करो मत त्याग करो ॥७७॥ स्कन्दपुराण में ऋषियोंके प्रति व्यासजीका वाक्य है कि लिंगके द्वारा शिवको सब जानते हैं शिवको ब्रह्मरूपसे कोई नहीं जानते हैं ॥७८॥ जड़ वस्तुको सब जानता है जड़ किसीको नहीं जानता है अतः शिव जड़ नहीं हैं स्वप्रकाश रूप हैं ॥७९॥ शिर मन्दिर है जिह्वके ऊपर घाँटी शिव लिंग है ब्रह्मरन्ध्रसे जलधारा आ रहा है जिह्व घंटा है ॥८०॥ स्कन्द

मण्डलम् ॥ सोमसूत्रन्तु मूत्राद्यं प्रोक्तमेतच्छिवा-
लयम् ॥ ८१ ॥ शिवस्थाने शरीरेस्मिन संस्थितः
स्वात्ममायया ॥ दुःखादि सागरे घोरे मुह्यमानश्च
सोचति ॥८२॥ ।

॥ इति शिवम् ॥

इति श्री मद्योगिवर्यविप्रराजेन्द्र स्वाम्यात्मज पं० कालिकेश्वर दत्त
संग्रहीते सिद्धान्तरत्नाकरे चतुर्थ उपासनाखण्डे द्वितीयस्तरङ्गः

अर्घा है सबका आधार नाभी है पैखाना पेशाब सोमसूत्र (मोरी) है
यह शरीर शिवालय है ॥८१॥ शिवस्थान शरीरमें रहकर यह जीव
मायासे मोहित होकर दुःखमें पड़ा हुआ है ॥८२॥

इति श्री भाषाटीकायां चतुर्थ उपासनाखण्डे द्वितीयस्तरङ्गः ॥

तृतीयस्तरंगः

श्रीगणेशाय नमः ॥ अथ तृतीयस्तरङ्गः ॥ ध्यात्वा रघुपतिं क्रुद्धं कालानलसमप्रभम् ॥ चीर कृष्णा जिन धरं भस्मोद्धूलित विग्रहम् ॥ रणेरिपून् रावणादीन् स्तीक्ष्णमाकर्ण वृष्टिभिः ॥ संहरन्तं महावीर मुग्र मैन्द्रर-थस्थितम् ॥१॥ अथ विष्णुना लक्ष्म्यासह दशावतार रूपेणापि शिवाराधनं कृतः ॥ कूर्म्मपुराणस्योत्तरार्द्धे एकत्रिंशेऽध्याये विष्णु वाक्यम् ॥ पुरा चैकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥ प्रबोधार्थं ब्रह्मणोमे प्रादुर्भूतो

दोहा—शम्भुरूप श्रीरामको हृदय कमलमें ध्याय ।
देव ऋषि पूजन कियो कहौं प्रमाण दिखाय ॥

श्रीगणेशाय नमः ॥ शिवभक्त शिरोमणि श्रीरामचन्द्रका मैं ध्यान करता हूँ सर्वांग भस्म धारण किये मृगछाला लिये इन्द्ररथपर बैठकर रावणादि राक्षसोंको पाशुपतास्त्रसे मारते हुए महावीर रामचन्द्र हमारा रक्षा करें ॥१॥ विष्णु भगवान दशो अवतार होकर और लक्ष्मीने भी शिव पूजन किया है सो प्रमाणके साथ आगे लिखते हैं ॥ कूर्म्मपुराण उत्तरार्द्धके एकतीसवें अध्यायमें विष्णु भगवानका वचन है कि पूर्वकालमें चराचर सब जगत नष्ट हो जानेपर एकार्णवमें हमको

महाशिवः ॥ १ ॥ तस्मात्काला त्समारभ्य ब्रह्माचाहं सदैव हि ॥ पूजयावो महादेवं लोकानां हितकाम्यया ॥२॥ पाराशरोपपुराणे एकादशाध्याये लक्ष्मीं प्रति विष्णु वाक्यम् ॥ शतवर्षं तपस्तप्तं तदाहं प्राणवल्लभे ॥ तत्प्रसादा दिदं ज्ञानं प्राप्तं वै परमं महत् ॥ ३ ॥ अहं शिवः शिवश्चायं त्वंचापि शिवएव च ॥ सर्वं शिवमयं भद्रे शिवाद्भिन्नं न किंचन ॥ ४ ॥ तथा पाद्मे गीतामाहात्म्ये विष्णुं प्रति लक्ष्मी वाक्यम् ॥ शया-लुरसि दुग्धाब्धौ भगवन् केनहेतुना ॥ उदासीन इवै

और ब्रह्माको प्रबोध देनेके हेतु महाशिव आविर्भाव हुए ॥१॥ उसी कालसे हम और ब्रह्मा दोनों लोकके हितार्थ शिवका पूजन करते हैं ॥२॥ पाराशर उपपुराणके अध्याय एग्गारहमें लक्ष्मीके प्रति विष्णु भगवानका वचन है कि हे प्राणवल्लभे ! सौ वर्ष तप करनेपर यह ज्ञान हमको मिला कि मैं शिव यह जगत शिव और तूँ भी शिव जो कुछ देखते हैं सो सब शिव शिवसे भिन्न कुछ नहीं है ॥३॥४॥ पद्मपुराणके गीता माहात्म्यमें विष्णुके प्रति लक्ष्मीका वचन है कि क्षीर समुद्रमें शयालु (सोते हुए) के सदृश और जगतके पालनमें उदासीन आप क्यों रहते हैं तब विष्णु भगवान बोले हे सुमुखी लक्ष्मी ! मैं नींदमें नहीं रहता हूँ माहेश्वर दृष्टिसे अन्तर निमग्न हो

श्वर्यें जगति स्थापयन्नपि ॥५॥ श्रीमहा विष्णु रुवाच नाहं सुमुखि निद्रालु र्निजमाहेश्वरं महः ॥ दृशात- त्वानुवर्तिन्या पश्याम्यन्तर्निमग्नया ॥ ६ ॥ तथा देवी भागवते षष्ठस्कन्दे षष्ठाध्याये प्युक्तम् ॥ श्री विष्णु रुवाच ॥ शृणुकान्ते प्रवक्ष्यामि यंध्यायामि सुरो- त्तमम् ॥ आसुतोषं महादेवं गिरिजा वल्लभं हृदि ॥७॥ तत्रैव चतुर्थस्कन्दे उनत्रिंशेध्याये ब्रह्माणम्प्रति विष्णु वाक्यम् ॥ वयं मायावृताः कामं नस्मरामो जगद्- गुरुम् ॥ परमं पुरुषं शान्तं सच्चिदानन्द मव्ययम् ॥८॥ लैङ्गे षट्चत्वारिंशति तमे ध्याये ॥ पूजनीयः शिवो-

शिवके ध्यानमें रहता हूँ ॥५॥६॥ देवीभागवत स्कन्द छठवाँ अध्याय छः में लक्ष्मीके प्रति विष्णु भगवानका वचन है कि हे कान्ते ! जिस देवका मैं ध्यान करता हूँ सो सुनो आशुतोष महादेव गिरिजावल्लभ शिवका मैं सदा हृदयसे ध्यान करता हूँ ॥७॥ पुनः वहाँ ही चौथे स्कन्दके उनतीसवें अध्यायमें लिखा है कि विष्णु भगवान ब्रह्माजीसे कहते हैं कि हम लोग उनके मायासे मोहित होकर परम पुरुष सच्चिदानन्द नाशरहित महादेवका स्मरण नहीं करते हैं ॥८॥ लिंगपुराणके छीआलिसवें अध्यायमें लिखा है कि श्रद्धा- पूर्वक सब देवोंमें पूजनीय शिव हैं क्योंकि सब जगत

नित्यं श्रद्धया देवपुङ्गवैः ॥ सर्व्वं लिंगमयो लोकः सर्व्वं लिंगे प्रतिष्ठितम् ॥ ९ ॥ इन्द्रनीलमयं लिङ्गं विष्णुना पूजितं सदा ॥ पद्मरागमयं शक्रोहैमं विश्रवसः सुतः ॥१०॥ तत्रैव एकोनत्रिंशेध्याये ॥ अविमुक्तेश्वरंप्राप्य वाराणस्यां जनार्दनः ॥ क्षीरेण चाभिषिच्येशं देवदेवं महेश्वरम् ॥ ११ ॥ काशीखण्डेऽपि ॥ आकारमविमुक्तस्य दृष्ट्वा ब्रह्माच्युतादयः ॥ लिंगं संस्थापयामासुर्वशिष्टाद्यामहर्षयः ॥ १२ ॥ तत्रैव विष्णु वाक्यम् ॥ मयि या परामाशक्तिः स्त्रिलोक्यारक्षणक्षमा ॥ तत्र हेतु र्महादेवः स सुदर्शन चक्रदः ॥ १३ ॥ पुरा जलन्धरो

लिंगमय है और लिंग ही में प्रतिष्ठित है ॥९॥ इन्द्र नीलमणिका लिंग विष्णुने पूजन किया पद्मरागमणिका इन्द्र सुवर्णका विश्वश्रवा पुत्रोंने पूजन किया है ॥१०॥ पुनः वहाँ ही अध्याय उनतीसवेंमें लिखा है कि काशीमें जाकर विष्णु भगवानने अविमुक्तेश्वर महादेव को दूधसे स्नान कराया है ॥११॥ काशीखण्डमें भी लिखा है कि सृष्टिके आदिमें ब्रह्मा विष्णु महर्षियोंने अविमुक्तेश्वर महादेवका आकार देखकर उन्हींके सदृश लिंग स्थापन किये हैं ॥१२॥ पुनः वहाँ ही विष्णु भगवानका वचन है कि तीनों लोककी रक्षा करनेकी शक्ति जो मुझमें हुई है उसका हेतु महादेव हैं और वही सुदर्शनचक्र

दैत्यः ममापि परिकम्पनः ॥ पदांगुष्ठाग्ररेखोत्थं चक्रं कृत्वा हरोहरत् ॥१४॥ तच्चक्रं च मयालब्धं नेत्र पद्मार्च्चना द्विभोः ॥ एतत्सुदर्शनाख्यम्वै दैत्यचक्रप्रमर्दनम् ॥१५॥ शिवपुराणे वायुसंहितायां षड्विंशे ध्याये ऽपि ब्रह्मा ब्रह्मत्व माप्नोति विष्णु र्विष्णु त्वमागतः ॥ रुद्रोरुद्रत्व मापन्नो इन्द्र श्चेन्द्रत्व मागतः सितचन्दन तोयेन लिङ्गं स्नाप्य शिवं शिवाम् ॥१६॥ ब्रह्मणा विष्णु नावापि रुद्रेणान्येन केनवा ॥ लिङ्ग प्रतिष्ठा मुत्सृज्य कृयते स्व पदस्थितिः ॥१७॥ अण्डस्यान्तर्वहिर्वर्ति रुद्रलोक द्वयाधिपः शिवप्रियः शिवाशक्तः शिवपादा-

देनेवाले हैं ॥१३॥ पूर्वकालमें जलन्धर नामक दैत्य हमको भी डरानेवाला हुआ परन्तु दक्षिण पादके अंगूठाके रेखासे चक्र बनाकर शिवने उसको मारा ॥१४॥ सब दैत्योंको मर्दन करनेवाला यह सुदर्शन चक्रको मैंने नेत्ररूपी कमलसे शिवका पूजनकर प्राप्त किया है ॥१५॥ शिवपुराण वायुसंहिता अध्याय छब्बीसमें लिखा है कि ब्रह्मा ब्रह्मत्वको प्राप्त हुए विष्णु विष्णुत्वको रुद्र रुद्रत्व को इन्द्र इन्द्रत्वको प्राप्त हुए सफेद चन्दनके जलसे शिवशिवाके स्नान करानेसे ॥१६॥ ब्रह्मा विष्णु रुद्र और सब देवता लिंग पूजा ही करके अपने-अपने पदकी स्थिति करते हैं ॥१७॥ अण्डके भीतर

र्चने रतः ॥१८॥ अण्डस्यान्त र्वहि र्वर्ति विष्णु ल्लोंक द्वयाधिपः ॥ अप्रमेय वलो मायी मायया मोहयन् जगत् ॥१९॥ मूर्ति कृत्य महाविष्णुः सदाविष्णु मथापिवा ॥ शिवप्रियः शिवाशक्तः शिवपादार्चनेरतः ॥२०॥ पाराशरोप पुराणे षोडशाध्याये ॥ रौद्रलिङ्गं महाविष्णुः भक्त्या शुद्धं शिलामयम् ॥ चारुचित्रं समभ्यर्च्य लब्धवा न्परमंपदम् ॥२१॥ साच लक्ष्मीः समाख्याता महाविष्णोस्तु वल्लभा ॥ यस्य लिङ्गार्चने नैव स्वभर्तु र्वल्लभाभवत् ॥२२॥ ब्रह्मा सर्वजगत्कर्ता यस्य लिङ्गार्चनेनच ॥ शचीदेवी स्त्रिय-

और बाहर रहनेवाले दोनों रुद्र शिवके प्रिय शिवमें आसक्त शिवपादका पूजक हैं ॥१८॥ अण्डके बाहर भीतर रहनेवाले दोनों विष्णु अप्रमेय वलवान् मायायुक्त हो जगतको मोहन कर महा विष्णु सदा विष्णु दोनों शिवप्रिय शिवमें आसक्त शिवपादार्चनमें रहते हैं ॥१९-२०॥ पाराशर उपपुराण अध्याय सोलहमें लिखा है कि पत्थरका रुद्र लिंग पूजन करके महाविष्णु परमपदको पाये ॥२१॥ और लक्ष्मी भी शिव पूजनके प्रसाद ही से अपने पतिके प्रिय हुई ॥२२॥ और लिंग पूजाहीके प्रभावसे ब्रह्मा सब जगतका कर्ता हुए ॥ और इन्द्राणी आदि देवस्त्रियोंने भी लिंग पूजा की है अतः सबको पूजन

श्चान्याः सपूज्यः सर्वचेतनै ॥२३॥ तथा चक्र सुदर्शन प्राप्त्यर्थं विष्णुः शिवाराधनं कृतः तदुक्तं लैङ्गे पूर्वार्द्धे सप्तपञ्चाशत्यध्याये ॥ लिङ्गं स्थाप्य यथान्यायं हिमवच्छिखरे शुभे ॥ देवं नाम्ना सहस्रेण भवाब्देन महेश्वरम् ॥ पूजयामास विधिव च्छंकरं लोकशंकरम् ॥२४॥ परीक्षार्थं हरेः पूजा कमलेषु महेश्वरः ॥ गोपयामास कमलं तदैको भुवनेश्वरः ॥२५॥ ज्ञात्वा स्वनेत्र मुद्धृत्य सर्वसत्वावलम्बनम् ॥ पूजयामास भावेन नाम्नातेन जगद्गुरुम् ॥२६॥ कोटिभास्कर सकाशं जटामुकुट मण्डितम् ॥ वसानं चर्मवैयाघ्रं

करना चाहिए ॥२३॥ चक्रसुदर्शन प्राप्तिके हेतु विष्णु भगवान शिव पूजन किये हैं सो लिखा है लिंगपुराण पूर्वार्द्ध अध्याय पचहत्तरमें कि हिमवान पर्वतपर शिवलिंगको स्थापन कर शिवके हजार नामोंसे हजार कमल पुष्प चढ़ानेका नियम किये ॥२४॥ हरिके पूजाके परिक्षाके हेतु शिवने उन फुलोंमेंसे एक फुल गुप्त कर दिया ॥२५॥ एक फुलके स्थानमें विष्णुने अपना नेत्र निकालकर चढ़ा दिया ॥ २६॥ तब शिव जटामुकुट धारण किये कोटि सूर्यके प्रकाशखण्ड चन्द्रमा ललाटमें धारण किये व्याघ्रचर्मपर बैठे आविर्भाव होकर चक्र सुदर्शन दिये ॥२७॥ आदित्य उपपुराणमें विष्णुके प्रति शिवका

चन्द्रार्द्धकृत शेखरेम् ॥२७॥ आदित्योपपुराणे विष्णु-स्प्रतिशिव वाक्यम् ॥ दिव्यंददामि तेचक्र मद्भुतं यत्सु-दर्शनम् ॥ जलन्धर वधार्थाय निर्मितं यन्मया पुरा ॥२८॥ त्रयोविंशे ऽध्यायेऽपि ॥ जलन्धर महादैत्य हृतत्रैलोक्य सम्पदम् ॥ चरणांगुष्ठ रेखोत्थं जलमध्ये सुदर्श-नम् ॥ २९ ॥ गुणावस्थाग्नि कालात्म लोकशक्ति त्रयात्मकम् ॥ शिवः कालात्मकं चक्रं दक्षिणां-गुष्ठ रेखया ॥ ३० ॥ निर्ममे मोघ संकल्पः क्षण काष्ठा कलात्मकम् ॥ तेनासुरं द्विधाकृत्वा ररक्ष परमेश्वरः ॥३१॥ पाद्मे पातालखण्डे विष्णु वाक्यम् ॥ मया वर्ष सहस्रैस्तु सहस्राब्जै स्तथान्वहम् ॥ भक्त्या सम्पूजितो

वाक्य है कि जलन्धर दैत्यके मारनेके लिये जो अद्भुत सुदर्शन चक्र मैंने बनाया था वही चक्र इस समय मैं तुमको देता हूँ ॥२८॥ पद्मपुराणके अध्याय तेइसमें लिखा है कि जलन्धर महादैत्य तीनों लोकका सम्पत हर लिया तब शिवने चरणके अंगुष्ठाके रेखासे जलमें सुदर्शनचक्रको बनाये ॥२९॥ तीनों गुण तीनों लोककी शक्ति कालाग्निरूप चक्र, दाहिने अंगुठाके रेखासे बनाकर और उसी चक्रसे मारकर जगतका रक्षा किये ॥३०॥३१॥ पुनः वहाँ ही पातालखण्डमें भगवानका वचन है कि मैं एक हजार वर्ष तक नित्यनियमसे हजार

पीशः पा दोनों दर्शितस्त्वया ॥३२॥ स्कान्दे ॥ निशम्य वेदार्थ मशेषमच्युतः प्रणम्य शम्भुं शशिशेखरं हरम् प्रसाद्य पादाम्बुज मास्तिको हरिः स्वमूर्ध्नि विन्यस्य करद्वयेन ॥३३॥ शिवरहस्ये सप्तमांशे भगवतिम्प्रति शंकर वांक्यम् ॥ पुरा मदं घ्रीरेखाभिः सृष्टं तच्चक्र मुत्तमम् ॥ सुदर्शनाख्य ममलं कोटिसूर्य्य समप्रभम् ॥३४॥ तेन घोरतरं तप्तं ततस्तत्फल मीदृशम् ॥ तेनैव विष्णुनातत्र चक्रं लब्धं वरानने ॥३५॥ तत्रैव विष्णु वाक्यम् ॥ शिवलिङ्गार्च्चनेनैव सन्तुष्टः पार्वतीपतिः ॥ पुरामह्यं ददौ विप्रा विष्णुत्वं करुणानिधिः ॥३६॥ ददौततः परंमह्यं वैकुण्ठमपि शंकरः ॥

कमलोंसे पूजन किया तब शिवका चरणारविन्दका दर्शन हुआ ॥३२॥ स्कन्दपुराणमें लिखा है कि विष्णु भगवान त्राहि-त्राहिकर शिवके दोनों चरणोंपर मस्तक रखकर स्तुति किये ॥३३॥ शिवरहस्यके सातवें अंशमें भगवतीके प्रति शंकरका वचन है कि पूर्वकालमें अपने पैरके रेखासे मैं अद्भुत सुदर्शनचक्रको कोटि सूर्यके सदृश प्रकाशमान बनाया विष्णु भगवानने जब घोर तप किया तब मैंने उस चक्रको दे दिया ॥३४॥३५॥ वहाँ ही विष्णु भगवानका वचन है कि लिंगपूजासे प्रसन्न होकर शिवने पूर्वकालमें विष्णुत्व हमको

सुदर्शनाभिधं चक्रं ददौ मह्यं ततः परम् ॥ ३७ ॥
शंकर संहितायाम् ॥ पादेन निर्मितं चक्रं जलन्धर
महार्णवे ॥ बलवान् यदि चोद्धर्तुं तिष्ठयोद्धूं नचा-
न्यथा ॥३८॥ उसनशोपपुराणे एकोनविंशे ध्याये ॥
विष्णुम्प्रति शिववाक्यम् ॥ अयुतानां त्रयंचैव मेका-
ग्रमनसात्वया ॥ विन्ध्यक्षेत्रे पुण्यतमे तपश्चर्य्या कृता-
शुभा ॥३९॥ गृहणाचक्रं मम सूर्य्यवर्चसं सुदर्शनं-
नाम सुरारी घातकम् ॥ यतोऽत्रक्षेत्रे सुरवृन्दपूजिते
स्वनेत्र मुत्पाट्य समर्पितं मयि ॥४०॥ वरमेकं महा-
विष्णो ददामि वल्लभोत्तम रूपंमनोहरंभूया त्सर्वलोक

दिये रहनेको वैकुण्ठधाम और सुदर्शन चक्र दिये ॥३६॥३७॥
शंकर संहितामें लिखा है कि जलन्धर दैत्य शिवसे युद्ध करनेको
आया तब शिवने उससे कहा कि मैंने पैरके अंगुठाके रेखासे समुद्रमें
एक चक्र बनाया है उसको उठा सको तो हमसे युद्ध करो ॥३८॥
उसनश उपपुराणके उनइसवें अध्यायमें विष्णुके प्रति शिवका वचन
है कि तीस हजार वर्ष विन्ध्यक्षेत्रमें तुमने देवताओंसे पूजित पवित्र
क्षेत्रमें तप किया ॥ और नेत्र चढ़ाया अतः सूर्यके समान तेजवाला
सुदर्शनचक्र राक्षसोंको मारनेवाला मैं तुमको देता हूँ ॥३९॥४०॥
और एक वर देता हूँ कि सब लोकको मोहन करनेवाला मनोहर

विमोहनम् ॥४१॥ अक्षीणी विपुलेरम्ये सरोजइव सुन्दरी ॥ भूयास्तांते महाविष्णो पुण्डरीकाक्ष सञ्ज्ञया ॥४२॥ नते भविष्यति जरा मरणं नकदाचन ॥ सर्वज्ञत्वं चेश्वरत्वं नियन्तृत्वञ्च सर्वशः ॥ अन्तर्य्यामित्व मक्षय्य भविष्यसि निरन्तरम् ॥४३॥ लैङ्गे ॥ रुद्रप्रसादाद्धिमिमं सुदर्शन मितिस्मृतम् ॥ लब्धवान्भगवान्विष्णुः कोटि सूर्य्यं समप्रभम् स्कान्दे अम्बिकाखण्डे प्युक्तम् ॥ यत्र विष्णुर्वरान्लेभे देवमाराध्य शंकरम् ॥ चक्रं सुदर्शनंनाम द्विषता मन्तकोपमम् ॥४५॥ काशीखण्डे व्यास भुजस्तम्भोपक्रमे वेणीमाधव

कमलके सदृश नेत्र हो पुण्डरीकाक्ष नाम हो ॥४१॥४२॥ और वृद्धता मरण न हो सर्वज्ञ ईश्वर नियन्ता अन्तर्यामी अक्षय यह सब गुण हमारे आशीर्वादसे तुम्हारेमें हो जाय ॥४३॥ लिंगपुराणमें लिखा है कि कोटि सूर्य और अग्निके सदृश प्रकाशवाला सुदर्शनचक्र रुद्रके प्रसादसे विष्णुने पाया ॥४४॥ स्कन्दपुराणके अम्बिका खण्डमें लिखा है कि शंकरका पूजन करनेसे विष्णु भगवानको अनेक वर मिले और शत्रुओंको मारनेवाला सुदर्शनचक्र मिला ॥४५॥ काशीखण्डमें लिखा है कि एक समय वेदव्यास शिवसे विमुख होकर काशीमें जाकर शिवका निन्दा किये तब शिवके आज्ञासे नन्दीने

विष्णु वाक्यम् ॥ तत्प्रसादा दहंचक्री लक्ष्मीश स्तत्प्रसादतः त्रैलोक्य रक्षा सामर्थ्यं दत्तंते नैत्रशम्भुना ॥ इदानिंस्तुहि तंशम्भुं यदिमे शुभमिच्छसि ॥४६॥ शिवपुराणे वायुसंहितायां पूर्वार्द्धे षड्विंशेध्याये ॥ तच्चक्रं तपसालब्ध्वा लब्धवीर्य्यो हरिः सदा ॥ जिघांसते सुरारीणां कुलं निघृण चेतसा ॥४७॥ पुनस्तत्रैव नवमाध्याये ॥ अहं घोरतरं तस्माच्चक्र मन्यं ददामिते ॥ एतदुक्त्वा हरोल्लिख्य दिव्यं कालानल प्रभम् ॥ विष्णवे प्रददौचक्रं घोरार्कायुत सुप्रभम् ॥४८॥ तत्रैव धर्मसंहितायाम् सप्तमाध्याये ॥ वाणा-

उनका वांक् पाद भुजा तीनों स्तम्भन कर दिया उसी समय वेणी माधव विष्णुने आकर व्यासने कहा कि शिवके प्रसादसे मैं चक्रीश लक्ष्मीश हूँ और उन्होंने ही तीनों लोककी रक्षा करनेकी शक्ति दी है उनकी स्तुति करो तब ही हमारा कल्याण है ॥४६॥ शिवपुराण वायुसंहिता पूर्वार्द्ध अध्याय छब्बीसमें लिखा है कि विष्णु भगवान शिवके तपसे बली होकर और चक्र पाकर राक्षसोंको मारे ॥४७॥ पुनः वहाँ ही अध्याय नवमें विष्णुके प्रति शिवका वचन है कि सुदर्शन चक्रसे अन्य चक्र तुमको मैं देता हूँ ऐसा कहकर दिव्य कालानलके समान कोटि सूर्य प्रकाशसे युक्त एक चक्र बनाकर शिवने

सुर संग्रामे युद्धावसाने श्रीकृष्णम्प्रति श्री शंकर वाक्यम् ॥ भगवन्देवकी पुत्र कृतं यत्क्रियते त्वया॥ माबाणस्य शिरच्छिन्धि संहरस्व सुदर्शनम् ॥४६॥ दत्तंमया पुरातुभ्यं अतिवीर्य्यरणेतव ॥ चक्रं जयश्च गोविन्द निवर्तस्व रणादतः ॥५०॥ तथा हरिवंशे भविष्य पर्वणि कैलाशयात्रायां मप्युक्तम् ॥ यत्रलेभे हरिश्चक्रं उपास्य वहुभिर्दिनैः चक्रं सुदर्शनं नामं द्विष-ता मन्तकोपमम् ॥५१॥ शिवरहस्ये सप्तमांशे ॥ पुरा-ब्रह्मादिभिः सार्द्धं विष्णुः काशींदिदृक्षया ॥ समाययौ

विष्णुको दिया ॥४८॥ पुनः वहाँ ही धर्मसंहिताके अध्याय सातमें कृष्णके प्रति शिवका वचन है कि हे देवकी पुत्र कृष्ण ! बाणासुरका बाहुबल नष्ट हो गया कर्तव्य कार्य हो गया शिर मत काटिये सुदर्शन चक्रको हटाइये ॥४६॥ पूर्वकालमें बाणासुर संग्राममें आपका जय और सुदर्शन चक्र मैंने ही दिया है अतः रणसे हटिये ॥५०॥ हरिवंशके भविष्यपर्वमें लिखा है कि बहुत दिन तप करके शत्रुओंके नाश करनेवाला चक्र सुदर्शनको शिवसे विष्णु भगवान प्राप्त किये ॥५१॥ शिवरहस्य अंश सातमें लिखा है कि पूर्वकालमें ब्रह्मादि देवोंको साथ लेकर विष्णु भगवान काशी देखनेको चले और दूर ही से मनोहरा काशीको देखकर परम आनन्द हो हाथ जोड़ दण्डवत किये और

ततोदृष्ट्वा दूरात्काशीं मनोहराम् ॥५२॥ प्रणम्य दण्डवद्भुमौ भूयोभूयः कृताञ्जलिः ॥ अवाप परमानन्दं दृष्ट्वा काशीति सादरम् ॥५३॥ इदमद्यियुगे धन्ये पुराडरीक निभंमम ॥ यतः शिवस्वरूपेयं काशीदृष्टामयाधुना ॥५४॥ स्कान्दे ॥ घोणत्वं वृषभत्व मर्चकवपु र्भार्य्या त्वमार्य्यापतेः वाणत्वं सखिता मृदङ्गवहता इत्यादि रूपंदधौ ॥ त्वत्पादे नयनार्पणञ्च कृतवान् त्वद्देह भागो हरिः पूज्यात्पूज्यतर स्त्वमेव नहिचे त्कोवा त्वदन्योधिकः ॥ ५५ ॥ घोणत्वं स्कान्दे अरगये पाण्डवैस्तस्तं दृष्ट्वाशम्भुः कृपाकरः ॥ वाराहं

अपनेको धन्य माने ॥५२॥५३॥ और कहने लगे कि यह कमलके सदृश मेरी दोनों आँखें धन्य हैं जो मैंने शिवस्वरूप काशीको देखा ॥५४॥ स्कन्दपुराणमें लिखा है कि विष्णु भगवान शिवके हेतु इतना रूपको धारण किये हैं शूकर, वृषभ, अर्चक, स्त्री और वाण, सखी, मृदंग बजानेवाला और शिवके ऊपर नेत्र चढ़ाये शिवके आधा गौरी गौरीके आधा विष्णु हैं तब भी शिव पूज्य न होंगे तो कौन पूज्य होगा ? इसका कथा पुराणोंमें विस्तारसे है सो क्रमशः आगे मैं देखता हूँ ॥५५॥ स्कन्दपुराणमें लिखा है कि पाण्डवोंके गुप्त वनवासके समय शिवने विष्णुको शूकर बनाकर अपने भिल्लका रूप

विष्णु माकल्य तत्रविव्याध सोर्जुनात् ॥५६॥ वृषभत्वं तत्रैव ॥ रावणाय वरंदातु मुद्यताय शिवायवै सर्वस्व

धारणकर शूकरके पीछे-पीछे धन्वाबाण सन्धान किये अर्जुनके बगलसे निकले और महाभारतमें यह भी लिखा है कि एक राक्षस शूकररूप होकर अर्जुनको मारने आया अर्जुन भी धन्वा उठाकर शूकरके पीछे चले दोनोंने शूकरको मारा बाद दोनोंमें युद्ध हुआ इस बातपर कि अर्जुनने कहा कि मैं मारा भिल्लने कहा कि मैं मारा बाद भिल्लसे लड़ाईमें अर्जुन हार गये तब अर्जुनको बहुत चिन्ता हुई कि महाभारतमें बड़े-बड़े महारथी वीरोंसे युद्ध करना है मैं एक जंगली भील्लसे हार गया तो और वीरोंसे कैसे लड़ूँगा थोड़ी देर तक चिन्तामें रहकर अर्जुन बोले कि हे भिल्ल ! मैं नित्य पार्थिव शिवलिंगका पूजन करता रहा सो आज नहीं किया हूँ अतः मैं हार गया तुम ठहरो मैं पूजनकर पुनः तुमसे लड़ूँगा भिल्लने कहा कि जाओ पूजा पाठ कर आओ अर्जुन स्नानकर पार्थिव लिंग पूजन करके शीघ्र ही युद्ध करनेको पहुँचे तो क्या देखा कि जो फूलकी माला पार्थिव लिंगपर चढ़ाये रहे हैं वही माला भिल्लके गलामें पड़ा है ऐसा देखकर अर्जुन समझ गये कि यह शिव हैं और स्तुतिकर भिल्लके पैरोंपर गिर पड़े भिल्ल रूपधारी शिव प्रसन्न होकर वर दिये कि महाभारतमें तुम्हारा जय होगा और पाशुपतास्त्र दिये ॥५६॥ वृषभत्व विष्णुका होना भी वहाँ ही लिखा है कि एक समय शिव प्रसन्न होकर रावणको सर्वस्व बरदान देनेको चले विष्णु भगवानने पार्वतीसे कहा कि रावण सर्वस्व वर पावेगा तो उसका कभी नाश नहीं होगा अतः कोई उपाय कीजिये

वरमाकांद्दय विष्णु र्नन्द्यभवद्भृशम् ॥५७॥ अर्चकत्वं शिवरहस्ये ॥ रुद्राक्ष धारणं कृत्वा भस्मधारण पूर्वकम् ॥ अनन्ये नैवभावेन शिव माराधयद्धरिः ॥५८॥ भार्यात्वं स्कान्दे ॥ भस्मासुर भयेनैव शिवस्तत्र पला-

भगवतीने नन्दीको किसी काममें भेज दिया और विष्णु भगवान नन्दी हो गये शिवजी नन्दीपर चढ़कर वर देनेको चले कुछ दूर जानेपर असली नन्दी पहुँचे तब शिवजीने जाना कि पहला नन्दी विष्णु हैं प्रसन्न होकर शिवने कहा कि वर माँगो तब विष्णुने कहा कि जो वर रावणको देनेके लिए आप जा रहे हैं सो वर हमहीं को देकर यहाँसे लौट चलिये शिवने वहाँ विष्णुको सर्वस्व (सब कुछ) वरदान देकर लौट आये ॥५७॥ अर्चकत्व तो कई जगह है परन्तु शिवरहस्यका लिखता हूँ विष्णु भगवान रुद्राक्ष भस्म धारणकर अनन्य (शिवसे अन्य दूसरा नहीं है) इस भावसे पूजन किया है ॥५८॥ स्त्रीत्व होना स्कन्दपुराणमें लिखा है कि भस्मासुर नामक एक दैत्य रहा उसने शिवका तपकर यह वर माँगा कि जिसके सिरपर मैं हाथ रखूँ सो भस्म हो जाय ऐसा वर पाकर उसने सोचा कि पहले मैं शिव ही के ऊपर हाथ रखकर पार्वतीको ले लूँ शिवके ऊपर हाथ रखनेको चला शिव भाग चले शिवने यह सोचा कि न जरूँ तो हमारा वचन झूठा होगा और इसको तृतीय नेत्रसे भस्म कर दूँ तो कृतघ्न कहाऊँगा शिव भागे जाते रहे रास्तेमें नारद ऋषि मिले नारदसे शिवने कहा कि विष्णुको

यितः ॥ पार्वतीरूप मास्थाय हरिर्मोहितवांस्तथा ॥५६॥ वाणत्वं महिम्नस्तोत्रे ॥ रथांगे चन्द्राकौं रथचरण पाणिः शर इति ॥ ६० ॥ तथा काशीखण्डेऽपि ॥ यद्बाणोभूच्छ्रीपतिर्यस्यचन्ता लोकेशोभूत् स्यननं यः समस्ता ॥ वाहावेदां यस्य यानेषुजाता दग्धा ग्रामास्ताः पुरास्तत्समः कः ॥ ६१ ॥ आदित्योपपुराणे ॥ अथ रुद्रस्य देवस्य निर्मितो विश्वकर्मणा ॥ सर्वलोकमयो दिव्यो रथोयत्नेन सादरम् ॥६२॥ सर्वभूत मयश्चैव सर्वदेव

बुला लाओ नारद वैकुण्ठसे विष्णुको ले आये विष्णुने आकर कहा कि आप आगे चलिये मैं यहाँ ही ठहर जाता हूँ शिव आगे गये विष्णु पार्वतीरूप धारण कर वहाँ ही ठहर गये तब तक दैत्य पहुँचा पार्वतीको देख मोहित हो उनके पास गया और कहा कि तूँ हमसे विवाह करो पार्वतीने कहा कि ठीक है परन्तु तुम शिरपर हाथ रखकर प्रतिज्ञा करो उसने झटसे शिरपर हाथ रखकर प्रतिज्ञा करना चाहा तब तक भस्म हो गया ॥५६॥ वाणत्व महिम्नस्तोत्रमें लिखा है कि त्रिपुर नामक दैत्यको मारनेके हेतु सूर्य चन्द्र दोनों रथका चक्र हुए विष्णु वाण हुए ॥६०॥ काशीखण्डमें लिखा है कि विष्णु वाण हुए दशोदिक्पाल रथ हुए चारोवेद घोड़ा हुए और उसी रथपर बैठकर शिव एक ही वाणमें त्रिपुरका तीनों पुर भस्म कर दिये ॥६१॥ आदित्योपपुराणमें लिखा है कि त्रिपुरके मारनेके हेतु विश्वकर्माने सब

मयस्तथा ॥ सर्व्ववेद मयश्चैव सौवर्णः सर्वसम्वतः ॥ ॥६३॥ रथांगं दक्षिणं सूर्यो वामाङ्गं सोम एव च ॥ दक्षिण द्वादशारन्तु षोडशारं तथोत्तरम् ॥६४॥ पाद्मेऽपि ॥ जगतिन्तु रथंकृत्वा सयोज्य वेदवाजिमम् ॥६५॥ सखीत्वं स्कान्दे ॥ मोहिन्या मोहितः शम्भुः स्वर्णादिन् जनयन् विभुः ॥ असङ्गोह्यय मित्यादि श्रुतिस्तस्याप्य सङ्गता ॥ ६६ ॥ स कदाचिद्धरिम्पश्यन् योषिद्रूपेण चावृतः ॥ शालवृक्षान्समाकीर्य रेमेते नैव भूरिशः ६७

देवमय और सब जीवमय सुवर्णका रथ बनाये ॥६२॥६३॥ सोलह कलाओंसे युक्त चन्द्रमा वायाँ चक्र और बारह कलाओंसे युक्त सूर्य दाहिना चक्र हुए ॥६४॥ पद्मपुराणमें लिखा है कि पृथ्वी रथ हुई वेद घोड़ा हुए ॥६५॥ सखीत्व होना स्कन्दपुराणमें लिखा है कि समुद्रसे जब मद्य अमृत निकला तब विष्णु भगवान मोहिनीरूप धारण कर देवताओंको अमृत असुरोंको मद्य दिये उसी रूपको देखकर शिवको मोह हुआ साँखुके घोर वनमें विष्णुके साथ कई हजार वर्ष तक शिव रमण किये उसी रज वीर्जसे सोना चाँदी पैदा हुआ शिव तो असङ्ग हैं फिर उनको मोह क्यों हुआ ? लोकके उपकार करनेके हेतु ॥६६॥६७॥ मृदङ्ग वाद्यत्व स्कन्दपुराणके ब्रह्मोत्तर खण्डमें लिखा है कि नित्य प्रदोष कालमें सरस्वती वाँसुड़ी बजाती हैं इन्द्र वेणु ब्रह्मा ताल बजाते हैं विष्णु सघन बाजावाला मृदङ्ग बजानेमें बड़े

मृदङ्ग वाद्यत्वं ब्रह्मोत्तर खराडे ॥ वाग्देवी धृत वल्ल-की शतमखो वेणुंदधत्पद्मजस्तालोन्निद्रकरो रमा भग-वती ज्ञेय प्रयोगावृताः ॥ विष्णुःसान्द्र मृदङ्ग लम्बन-पटुर्देवाः समन्तात्स्थिताः सेवन्ते तमनु प्रदोषसमये देवं मृडानीपतिम् ॥ ६८ ॥ गन्धर्व यक्ष पतगो रग सिद्ध साध्या विद्याधरा मरगणाप्सरसांगणाश्च ॥ येन्ये त्रिलोक निलये सह भूतवर्गाः प्राप्ते प्रदोष समये हर पार्श्व संस्था ॥ ६९ ॥ नयनार्पणत्वं महिम्नस्तोत्रे ॥ हरिस्ते साहस्रं कमलवलिमा धायपदयो र्यदेकोनेतस्मि-न्निजमुदहरं नेत्रकमलम् ॥ ७० ॥ अद्भुत रामायणे

समर्थ हैं और देवतागण चारों तरफसे स्थित हो शिव पार्वतीका सेवन करते हैं ॥६८॥ गन्धर्वगण, यक्षगण, अप्सरागण, सर्पगण, सिद्धगण, साध्यगण, विद्याधरगण, देवगण और जितने तीनों लोकमें भूत प्रेत पिशाचगण हैं सो सब प्रदोष कालमें शिवके समीप जाकर उनका स्तुति पूजन करते है ॥६९॥ नयनार्पणत्व महिम्नस्तोत्रमें लिखा है कि विष्णु भगवान हजार कमल नित्य चढ़ानेका नियम किये एक दिन एक कमल घट जानेपर अपना नेत्र निकालकर चढ़ा दिये ॥७०॥ अद्भुत रामायणके द्वितीय सर्गमें विष्णु भगवानका वचन है कि पूर्वकालमें श्रीरूद्रदेवके प्रसादसे दैत्योंका नाश करनेवाला

वाकारो हेमवर्णोऽस्य स्थानञ्चैचोत्तरंमुखम् ब्रह्माऽधिदैवतं छन्दो वृहतीचाङ्गिराऋषिः ॥८॥ यकारोरक्त वर्णश्च स्थान मुर्द्ध मुखं विराट् छन्दोह्यार्ष भरद्वाजः स्कन्दो दैवत मुच्यते ॥९॥

॥ भाष्यम् ॥

वाकारस्य सुवर्णवर्णः उत्तरंमुखं ब्रह्मादेवता वृहती छन्दः अङ्गिरा ऋषिः ॥८॥ यकारस्य रक्तवर्णं उर्द्धमुखं विराट छन्दः कार्तिकेयो देवता भरद्वाज ऋषिः प्रवर्तकश्चेति ॥९॥

भाष्य प्रदीपम् ॥

ब्रह्मादेवतेति तदुक्तं ब्रह्मणः सृष्टकर्तृत्वं विष्णोश्चपालनं स्मृतम् संहर्ता रुद्रदेवश्च त्रिधाभिन्नो महेश्वरेति स्मृत्यात्रयाणा मंत्रैवान्तर्भावः ८ उर्ध्वमुखमिति या ईशान नामिकामूर्तिः पूर्वाभिमुखा सर्वश्रेष्ठाप्रकृतिभोक्ताक्षेत्रज्ञेस्थिता १—यांतव-

पुरुषसञ्ज्ञिका गुणाश्रया उत्तराभिमुखा अव्यक्तेस्थिता २—या अघोराख्यादक्षि-णाभिमुखामूर्तिः बुद्धितत्वेस्थिता ३—या वामदेवनामिका पश्चिमाभिमुखा अहं-कारेस्थिता ४—या सद्योजात नामिकामूर्तिः उर्ध्वमुखा मनसिस्थितेति बोध्यम् ॥९॥

न्यासमस्यप्रवक्ष्यामि सर्वसिद्धि करम्परम् ॥ सर्व पाप हरश्चैव त्रिविधोन्यासमुच्यते ॥१०॥ उत्पत्तिस्थिति संहार भेदतस्त्रिविधस्मृतः ॥ ब्रह्मचारीगृहस्थानां यती-नांक्रमशोभवेत् ॥११॥

॥ भाष्यम् ॥

अथ अङ्गन्यास करन्यास देहन्यासम्विना जपः न सम्यक् फल-दस्तस्येति स्मृत्या न्यासस्यावश्यकत्वादाह न्यासेति तथा च उत्पत्ति स्थिति संहृति भेदेन न्यासस्त्रिविधः क्रमशो ब्रह्मचारी गृहस्थ यतीनां कर्तव्यमिति विवेकः ॥ १० ॥ ११ ॥

॥ भाष्य प्रदीपम् ॥

ब्रह्मचारीणां वेदवेदाङ्गादि बहुनिकलाकौशलादि पठित व्यानित्याशायेन उत्पत्तिन्यासमुक्तं । गृहस्थानां पुत्रपौत्रादि सम्पादनकर्तृत्वात्स्थितिन्यास उदा-हृतः । सर्वकर्म्माणिसंत्यज्य सन्यस्यप्रव्रजेद्गृहादिति स्मृत्या यतीनां त्यागस्य प्रधानत्वात्संहृति न्यासमुक्त मितिभावः ॥१०॥११॥

अङ्गन्यास करन्यास देहन्यास इतित्रिधा ॥ मूर्द्धा-
दिपाद पर्यन्तं उत्पत्ति न्यास उच्यते ॥१२॥ पादादि-
मूर्द्धापर्यन्तं संहारोभवतिप्रिये ॥ हृदयास्पगलन्यासः
स्थिति न्यास उदाहृतः ॥१३॥ दक्षिणांगुष्ठ मारभ्य
वामांगुष्ठान्तएवहि ॥ न्यस्यतेयत्तदुत्पति विंपरीतस्तु
संहृतिः ॥१४॥

॥ भाष्यम् ॥

न्यासे त्रिविधो भेदमाह ॥ न्यासेति ॥ तद्यथा ॥ मूर्द्धा मारभ्य पादपर्यन्तं यन्न्यासः अङ्ग न्यासे उत्पत्ति न्यासः ॥ तथैव करन्यासे दक्षिणांगुष्ठ मारभ्य वा मांगुष्ठान्तं यन्न्यासस्तदुत्पत्ति न्यासः ॥ ब्रह्मचारीणामित्याशयः ॥ एवं अङ्गन्यासे पादमारभ्य मूर्द्धा पर्यन्तं यन्न्यासः संहृति न्यासः ॥ करन्यासे बामांगुष्ठमारभ्य दक्षिणांगुष्ठ पर्यन्तं संहृतिन्यासस्तु यतीनामिति विवेकः ॥ पुनः अङ्गन्यासे हृदयास्य गलन्यासः गृहस्थाना मङ्गन्यासः ॥ अंगुष्ठमारभ्य कनिष्ठिकान्तं द्वयों हस्तयोर्य न्यासस्सस्थितिन्यासः गृहस्थानामिति ॥१२॥१३॥१४॥

॥ भाष्य प्रदीपम् ॥

उत्पतिस्थिति संहृतिन्यासानांमध्ये स्थितिन्यासस्य स्वरूपं दर्शयितुमाह उत्पत्तिरिति ॥ तथाच ॥ अङ्गन्यासक्रमः ॥१२.१३॥१४॥

अंगुष्ठादिकनिष्ठान्तं न्यस्यते हस्तयोर्द्वयोः ॥ अतीवभोगदोदेवि स्थितिन्यासः कुटुम्बिनाम् ॥१५॥ शिरस्कन्द स्ततोदेहं सर्वमन्त्रेण संस्पृशेत् ॥ सदेहन्यास इत्युक्तः सर्वेषां सममेवहि ॥१६॥

॥ भाष्यम् ॥

स्थितिन्यासस्तु गृहस्थाना मतिभोग सुखदम् ॥१५॥ तथा देहन्यासः ब्रह्मचारी यती गृहस्थाणां मूलमन्त्रेण सर्वाङ्ग स्पर्शनं सर्वेषां सममेवेति बोध्यम् ॥ १६ ॥

॥ भाष्य प्रदीपम् ॥

ॐ हृदयायनमः नँ शिरसे स्वाहा मँ शिखायैवषट शिंकवचयोंहुँ वांनेत्रत्रयायवौषट यँस्त्रायफट् इत्यङ्गन्यासः अथ करन्यासोच्यते ॥ ॐ अंगुष्टाभ्यांनमः नँ तर्जनीभ्यांनमः मँः मध्यमाभ्यांनमः शिंअनामिकाभ्यांनमः वाँ कनिष्टिकाभ्यां नमः यँ करतलकर पृष्ठाभ्यांनमः इतिकरन्यासः ॥ ॐ नमः शिवायेतिमन्त्रेण सर्वाङ्ग स्पर्शनं देहन्यासः कुटुम्बिनां कर्तव्यमित्याशयः ॥१५॥१६॥

ऋषिर्ब्रह्मास्य मन्त्रस्य पङ्क्तीछन्दः प्रकीर्तितः ॥ महादेवोभवेद्देव स्तत्वार्थे विनियोजनम् ॥१७॥ प्रह्वत्वे नमसश्शक्तिः प्रणामोदैन्यपूर्वकः ॥ नमामिदेव देवेशं चतुर्णामिह सिद्धये ॥१८॥

॥ भाष्यम् ॥

अथास्य वेदचतुष्टयात्मक गायत्र्यर्थप्रतिपादकत्वा द्दष्ट्यादौ स्ताव-त्सकलपाठ फलकत्वेनाह ॥ ऋषिरिति ॥ तद्यथा ॥ असंकीर्त्यर्यदामन्त्री ऋषिश्छन्दश्चदैवतं नसम्यक् फलदस्तस्य निगदोप्यर्थपूर्वक इतिस्मृत्यन्त-रादितिभाव: ॥१७॥ तत्रतावत्पञ्चाक्षरो मनु:प्रोक्तो ॐकाराद्य: षडक्षर इत्यादि स्मृत्यन्तरादुद्धृतस्य वैदिक पञ्चाक्षर महामन्त्रस्य व्याख्यानं पञ्चाक्षर भाष्यामिधं वक्तुमुपक्रमते ॥ प्रह्वत्व इति ॥ तत्रैवंसति यस्मा-द्दैन्याच्छिव: प्रीतस्तद्दैन्यं हृदिलब्धये नमामिदेवदेवेशं सार्वभौमोप्यथा-न्यथेत्यादिस्मृत्युक्त दैन्यपूर्वकस्य हे देवदेवेश ! चतुर्वर्गसिद्धयेन मामीत्यर्थ: ॥ १८ ॥

॥ भाष्य प्रदीपन् ॥

अथ वेदादिस्तारको व्यय इत्यादि स्मृत्युक्त प्रणवघटितगाय त्र्यास्सकलवेद मूलकत्वादाह ॥ गायत्र्यर्थेति तत्रैवंसतीह सुपांसुलुगीति सूत्रेण ङसस्सुरादेशे भर्गस्य देवस्य वरेषु साधुषु वरेण्यं सवितुरिव ते जो रूपां शक्तिं धीमही त्यादिरर्थ: ॥१७॥१८॥१९॥

त्यागोहिन मसोवार्थ: आनन्द: प्रकृतेस्तथा ॥ अये-तिगमयेत्यर्थे तदातृप्तोह्यहंसदा ॥१९॥ वस्तुतस्तूर्य्य मेवस्या न्निर्गुणं ब्रह्मतत्परम् ॥ चतुर्थ्याभेदसम्बन्ध: कथ्यते प्रत्यगात्मनो: ॥२०॥

॥ भाष्यम् ॥

एवमर्थान्तराभिप्रायेणप्याह ॥ इत्यादि ॥ तत्रेत्थंसति साङ्गायेत्यादि मन्त्रपूर्वकत्वेन पत्रपुष्पादिकं मानसैर्व्वहिर्भावेनच समर्पयामीत्यर्थः ॥ ततश्च शिवशब्दस्यानन्दार्थक त्वात्तदर्थमामय स्वात्मानन्दे प्रापयेत्यर्थः ॥१९॥ अथापर मप्यर्थान्तर माह ॥ वस्तुतस्त्वति ॥ तथाचेह वेदवेद्ये शिवैकत्वे ब्रह्मेत्याहुर्नपुंसक मित्यादि स्मृत्यन्तराच्छिव-मद्वैतं तूरीयंमन्यन्त इत्यादि श्रुत्यन्तरा द्यदन्यदन्यत्रविभाव्यतेभ्रमादध्यासइत्याहुर मुम्निपश्चित इत्यादि स्मृत्यन्तराच्च प्रतिप्रातिलोम्येन मिथ्याध्यस्त प्रपञ्च रूपेणाञ्चति प्रकाशतइत्यर्थात्प्रत्यगात्मनोर्न्नामद्वासुपर्णेत्यादिश्रुत्युक्त जीवात्मेश्वरात्मनश्चैकत्वेन ममाप्ययस्वात्मनाता-त्म्यापन्नं कुर्वीतिपरमार्थः ॥२०॥ तथा पञ्चाक्षरस्य सृष्टिस्थितिलय

॥ भाष्य प्रदीपम् ॥

नन्वेवन्त ह्यद्वैत हानिरिति चेन्नेत्याह ॥ गायत्र्यर्थेति ॥ एवंन्तर्हि नहिविज्ञातुर्विज्ञाते विपरि लोपो वियत इत्यादिश्रुतेर्न्नाद्वैतहानिरित्यवधेयम् ॥ २० ॥ एकएव

वाकारेण भवेत्सृष्टिः शिकारेणतु पालनम् ॥ संहृतिश्चमकारेण त्रिधाभिन्नः सदाशिवः ॥२१॥ नकारोराज्यकर्ताच देवानां शाशकः परः ॥ यकारो युद्धकर्ताच स्कन्ददेवोयतोहिस ॥२२॥

॥ भाष्यम् ॥

कतृत्वमप्याह ॥ वाकारेति ॥ वाकारस्य ब्रह्मदैवत्वात्सृष्टि कतृत्वं शिकारस्य विष्णुदैवत्वात्पालनत्वं मकारस्य रुद्रदैवत्वात्सं हृतित्वञ्चसिद्धम ॥ तमसाकाल रुद्राख्यं रजसाकनकाण्डजम् सत्वेन सर्वगं विष्णुंगुणातीतो महेश्वरेति भारतोक्या त्रयाणामादि कर्तासदाशिवेतिपरमार्थतः ॥२१॥ इन्द्रदैवत्वा नकारस्यराज्य कतृत्वं यकारस्यस्कन्ददैवत्वाद्युद्धकतृत्वमपिसिद्धम् ॥२२॥

॥ भाष्य प्रदीपम् ॥

त्रिधाभिन्नो ब्रह्मविष्णु महेश्वरेति स्मृत्याशिवस्यैव सकर्तृत्वं सिद्धमिति भावः ॥ २१ ॥ २२ ॥

अष्टादशपुराणानां निष्ठाकाष्ठामहेश्वरे निग्रहानुग्रहेणैव रूपेणैवन चान्यथा ॥२३॥ रामरावणयोर्य्युद्धं शिवः पश्यत्यतन्द्रितः ॥ सेयं लीला शिवस्यैवमल्लयोरिव पश्यतः ॥२४॥

॥ भाष्यम् ॥

नन्वेतावतापि मतभेदेन पुराणाना मन्यदेवपरत्वमप्यस्ती नेत्याह ॥ अष्टादशेति ॥ एवंसति वेदार्थानि मदर्थानि पुराणानि नवीकुरू इत्यादिना ब्रह्मवैवर्ते यज्ञवैभव खण्डस्योत्तर भागे व्यासम्प्रति सदाशिवोक्त्याप्यष्टादशपुराणानामष्टादश विद्यानाञ्चमहेश्वर परत्वमेव स्फुटीकृतम् तत्रैवं सति

लक्ष्मीवाकुशचिवीयत्र मदोदर्य्याः पुरांगण इत्यादिस्कान्दोक्त्या निग्रहेण ब्रह्मदीनां रावणपरत्वोक्त्या शिवपरत्वम् ॥ एवं महापाशुपतनामप्रगृह्याण-रघुद्वहएतदासाद्यपौलस्त्यं जाहिमाशोकमर्हसी त्यादिनापाद्मेरामचन्द्रम्प्र-त्यनुग्रहेण वरदानफलोक्त्याविष्णु परत्वमपीतिविवेकः॥२३॥ ननुरामराव-णयोर्य्युद्धं रामरावणयोरिवे त्यादिस्मृत्या देवासुरत्वेनोभयोस्समकच्छत्वा-द्रावणस्या पिलीलापेक्षितेति नेत्याह ॥रामेति॥ तत्रैवं सतीहामुत्रतटे पूज्यं तल्लिङ्गंदेवदानवैरि त्यादिपाद्मोक्त्या मल्लयोरिवयुद्धयमानयोरनयोर्य्युद्धं पश्यतः शिवस्यैवलीला नतयोरितिवोध्यम् ॥२४॥ अथैवंसति पृथ्वीपीठ मित्याद्युभय विधत्वेनाने कविधप्रमाणेन सर्वैर्देवैरपि शिवएवैकः पूज्य

॥ भाष्य प्रदीपम् ॥

यदर्थातीति ॥ अतएव मुखं पञ्चभिराख्यातं वाहवो दशभिर्म्मता हृन्नाभि-पादपर्यन्तं त्रिभिर्गीतामृतं विदु रित्यादि स्मृत्या सर्वशास्त्रमष्टादशपर्वोक्त गीत-याप्यमृतात्मा सदाशिव एव गीयत इत्यवधेयम् ॥ २३ ॥ फलोक्त्येति तद्यथा ततो लब्धवरः कृष्णो जनयित्वा सुपुत्रकान्हत्वा कंसं च नरकं हत्वा अन्याश्चा-सुरभूभुजानित्यादि कूर्मोक्त्या तद्वरदानोत्तरं फलोक्त्यैव कथितो वंशविस्तारो भवते त्यादिविष्णु परत्वमपीत्याशयः॥ प्रवल इति ॥ कथमन्यथा नहि विष्णुः प्रणमति कस्मैचिद्विबुधोत्तम विनाह्यात्मा नमेवेति तस्माच्छम्भुं भजाम्यह मित्यादि व्यासम्प्रत्यर्ज्जुनोक्तिः कूर्म्मेदर्शिते सङ्गच्छते ॥२४॥ शापोत्तरमिति ॥ तद्यथा ॥ अहिल्येत्वं नविज्ञातापतिं स्वस्य शिलाभव ॥ सचेन्द्रोपि भगैर्युक्त स्सहस्रैरिति चाशप दित्यादि गौतम शापोत्तरं शैवेनतपसा सहस्राक्षोप्यभूदित्यतोप्यवधार्यम्

तस्माच्छ्रौत प्रमाणेन सर्वैः पूज्यस्सदाशिवः ॥ शिवाभ्यन्तरतस्सर्वे पूज्यादेवा न संशयः ॥२५॥ वरिष्ठोद्विपदां विष्णुर्व्वरिष्टोभूत्प्रजापतिः ॥ वरिष्टोदैवतैरिन्द्रो वरिष्ठास्सर्वजन्तवः ॥२६॥

॥ भाष्यम् ॥

इत्युपसंहरन्नाह ॥ तस्मादिति ॥ तत्रेत्थं सत्यपूज्यपूजनेचैव पूज्यानांचाप्यपूजने सद्योदैवकृतस्तत्र: दण्ड:पत्ततिदारुण इत्यादि दक्षयज्ञप्रमथने भारतोक्यापि शिवम्विनासर्वेषा मपूज्यत्वञ्च स्फुटीकृतम् ॥ २५ ॥ ननुवेदरनेकैरहमेववेद्य इत्यादि श्रुत्यासर्वेषां शिवरूप त्वेपि देह भावेन परत्वापरत्वेति विवेचयन्नाह वरिष्ठ इति ॥ तथा चेहद्विपदां देवमनुष्याणां मध्ये प्रवलोविष्णुः एवमजानदेवानां प्रजापति र्यक्षादीनामिन्द्र इत्यादिरित्यासापेक्ष्यतार ताम्येनोच्चावच्चत्वं सर्वेषां विवेक्तव्यम् ॥ २६ ॥ अथैवंसति रुद्राकारतयारुद्रो वरिष्ठोदेवता न्तरादि-

॥ भाष्य प्रदीपम् ॥

दण्डइति—तदुक्त आगमान्तरे—अन्यंदेवम्पूजयित्वा शिवं पश्चाघजेद्यदितस्य पूजाफलं व्यर्थं भुज्यते राक्षसैरित्य वगन्तव्यम् ॥२५॥२६॥२७॥ कालभैरवना-

इत्येवं सर्वतोरुद्रः प्रवलोनैवचापरः सहस्राक्षोयतश्चेन्द्रो कमलाक्षो हरिर्यतः ॥२७॥

ब्रह्मापञ्चमुखोजातः पश्चाज्जातश्चतुर्मुखः कामोद्यनङ्गताम्प्राप्तो भस्माभस्मत्वमागतः ॥२८॥

॥ भाष्यम् ॥

त्यादि स्कान्दस्मृते, रोदयत्येवयः सर्वान्स्वस्मिन्भक्तिविवर्जिता नित्यादि स्मृत्यन्तराच्च सर्वतोगरिष्ठोरुद्रशब्दाभिधेयशिवएवेत्यभिप्रेत्य पुनरुपसंहरन्नाह ॥ इत्येवमिति ॥ तत्रैवं सति अपित्वं हि सहस्राद्यो मत्प्रसादाद्भूष्य तीत्यादिना गौतम शापोत्तरं सदाशिवरदानोक्त्या हरिस्ते साहस्रं कमलवलिमेति महिम्नोक्त्याच विष्णवे सदाशिव वरदानोक्त्या तयोस्तत्त्वमवधार्य्यम् ॥ २७ ॥

एवमपरमपि तत्परत्वे प्रमाणमाह ब्रह्मेति तत्रेत्थंसति मत्समस्त्वं नसन्देहो ब्रह्मन्पञ्चमुखो भवेत्यादिना पसापरिश्रान्तं ब्रह्माणम्प्रति वरदानोक्त्या गर्वेणतस्य शिरच्छेदनोक्त्याच तथात्वम् एवं शिवकामदहनात्तस्यानङ्गत्वं भस्मासुरस्य भस्मत्वञ्चेत्यादि स्पष्टमेव सदाशिवस्य सर्वतः परत्वोपपादनमित्यवधेयम् ॥ २८ ॥

॥ भाष्य प्रदीपम् ॥

मानं पुरुषं प्राहिणोत्तदाततोममार ब्रह्मासौ कलाभैरवहिंसितेति स्कान्दोक्यातथा भस्मासुरभयेनैव शिवस्तत्रपलायितः ॥ पार्वतीरूपमास्थाय हरिर्मोहितवास्तथे तिस्मृत्यापि च शिवस्यसर्वतः परत्वमितिभावः ॥२८॥

स्तस्माज्जातोहरिर्यद्व त्तद्रुद्रः प्रजापतेः ॥ नखनिभिन्नमात्रेण हरेः पादोदकीयतः ॥२९॥ महादेवेतिनान्मावै नसमोनपरस्ततः तस्माद्ब्रह्मादयस्सर्वे शिवाभ्यन्तरतस्थिताः ॥३०॥

॥ भाष्यम् ॥

ननु ब्रह्मणो ललाटाज्जायमानत्वेन तस्यापकृष्टत्वमपीति मैवमित्याह स्तम्भादिति ॥ तत्रैवं सति ध्यानार्थञ्चैव सर्वेषां ललाटाद्भवतो भव इत्यादिस्मृत्या जाह्नवीतियतः ख्याता न ततो न्यूनता शिव इत्यादि-स्कान्दस्मृत्याच सर्वतः परत्वं शिवस्यैवेति बोध्यम् ॥२९ ॥ नन्वेव मपि देवत्वन्तु सर्वत्र समानमेवेति मैवमित्याह ॥ महादेवेति ॥ तत्रेत्थं सति घोणत्व वृषभत्व मर्चक वपुर्भार्या त्वमार्यापते वाणत्वं सखिता मृदङ्ग वहता इत्यादि स्मृत्याच सर्वदेवानां शिवाभ्यन्तरितत्व मेवाव-धार्यम् ॥ ३० ॥

॥ भाष्य प्रदीपम् ॥

ध्यानार्थमिति ॥ अतएव ब्रह्मरन्ध्रेशिवं ध्याये द्ब्रह्माणन्तु हृदिस्थितम् नाभौविष्णुं समाराध्य प्रजयेत्परदेवता मित्यादिस्मृत्यन्तरादवगन्तव्यम ॥२९॥३०॥ घोणत्वमिति तथाच अरण्ये गाण्डवैस्ततं दृष्ट्वाशम्भुः कृपाकरः वाराहं विष्णुमा-कल्पतत्रविव्याध सोर्जुनादित्यादिस्कान्दोक्त्याघोणत्वं तथारावणायवरं दातुंउद्यता-यशिवायवै सर्वस्वत्वरमाक्रांद्य विष्णुर्नन्द्यभवद्भृशमितिस्कान्दोक्त्या वृषभत्वं हरिस्तेसाहस्रं कमलवलिमाधायेति महिम्नोक्त्वा अर्चकत्वं तथा भस्मासुरवधे पार्वती रूपत्वाद्भार्य्यात्वं त्रिपुरवधेवाणत्वं एवं मोहिन्यामोहितः शम्भुः स्वर्णादीन् जनयन् विभुरितिस्कान्दोक्त्यासपित्वं विष्णुः सान्द्रमृदङ्गवादन पटुरितिस्कान्दो-क्त्यामृदङ्गवाद्यत्वं तथायदेकोने तस्मिन्निज मुदहरन्नेत्र कमलमितिमहिम्नोक्त्या-नयनार्पणत्वं शिवस्यार्द्धस्थिता गौर तदर्द्धोहरिरिष्यतेति स्मृत्योक्त्याशिवस्यार्द्धा-र्द्धशरीर भागित्वमितिबोध्यम् ॥३०॥

सिंहो वृषो मयूरश्च सर्प्पोवैमूषकस्तथा ॥ एतेवैरत्व मापन्ना शिवाज्ञातो विशंकिताः ॥३१॥ एवं ब्रह्मा च विष्णुश्च शिवाज्ञातस्त्वकम्पयन् ॥ प्राप्ता अपि विमुह्यन्ति किमन्येषां विचिन्तनम् ॥३२॥

॥ भाष्यम् ॥

ननु कथं जानीमस्सर्वनियन्तृत्वं शिवस्यैवेति पश्वाद्य विशेषेणा प्याह ॥ सिंह इति ॥ एवंन्तर्हि भीषास्माद्वातः पवते भी षोदयति सूर्य इत्यादि श्रुत्या भस्माङ्ग रागतो माया त्रिनेत्रत्वा द्विभेत्यल मित्यादि स्मृत्यन्तराच्च स्पष्टमेव श्रुतियुक्तिभ्यां शिवस्य सर्वनियन्तृत्वम् ॥३१॥ तथेह मायापाशनिवद्धत्वाद् ब्रह्माद्यापशवस्मृतेति स्मृत्यन्तराद्ब्रह्मादि विषयत्वेनाप्याह ॥ एवमिति ॥ तथाचेह जीवद्वयं ततो गृह्य चैकमाह महेश्वरी ब्रह्माभवेति विष्णुस्त्वं भवेत्याहद्वितीयक मित्याद्यंगुल्यो धृत कोशस्थ वृत्तान्तेन ब्रह्मवैवर्तेऽपि द्रष्टव्यम् ॥ ३२ ॥

॥ भाष्य प्रदीपम् ॥

निवद्धत्वादिति अतएव ब्रह्मवैवर्ते कतिपर्य्यन्तमेतस्याः सुत्रैः कार्य्यंकरोम्यहं कस्यप्रीत्यैश्रमोऽयम्मे कदास्योपरमोभवेत् इत्युक्तञ्च विधिम्प्रेक्ष्य प्रोवाचमधु सूदनः सम्यगुक्तंत्वयाब्रह्म न्ममाप्येतद्विरोचत इत्यादिनातयोर्विमोहवृत्तं महा-कैलाशोक्त्या तत्रैवोक्तमवधेयम् ॥३१॥३२॥

शिवाज्ञयावहिर्भूता ब्रह्माद्या दण्डहेतवः ॥ दक्षा-
ध्वरेयतः शम्भो र्विमुखाभ्रष्टताङ्गताः ॥२३॥

॥ भाष्यम् ॥

अथ ब्रह्मादीनां विषयत्वमपि दर्शयन्नाह ॥ शिवाज्ञेति ॥ तत्रैवंसति यज्ञे त्वग्नयोनैव दीप्यन्ते दीप्यते नैवभास्करः ॥ ग्रहानैव प्रकाशन्ते देवर्षि मनुजाः कुतः ॥ इत्यादि शान्ति पर्वणि महाभारतोक्त्यापि सदाशिवविमुखत्वा त्सर्वदेवानां भ्रष्टत्व मवधार्यम् ॥२३॥

॥ भाष्य प्रदीपम् ॥

भ्रष्टत्वति निहत्यमुष्ठिनादन्ता न्पूष्णश्चैवन्यपातयत् ॥ वन्देर्हस्तद्वयंछित्वा जिव्हामुत्पाट्यलीलया तथा विष्णुं सगरुडं समायातं महाबलं विव्याधनिशितैर्बाणै स्तम्भयित्वा सुदर्शन मितिकूर्म्मोक्त्यादक्ष प्रजापतिं हस्ताभ्यामाच्छायतिष्ठं त विष्णुंतद्धस्तावपिछित्वा यज्ञाद्बहिष्कृत इत्यर्थः ॥२३॥

ब्रह्मणश्च शिरश्छिन्नं विष्णोर्हस्तौ तथाछिनत् ॥
पुष्पोर्दन्तां स्तथाछित्वा नेत्रं चन्द्रस्य चाछिनत् ॥२४॥

॥ भाष्यम् ॥

ब्रह्मणः शिरच्छेदनत्वमपि दर्शयन्नाह ॥ ब्रह्मणेति ॥ पुरापञ्चमुखोभुत्वा गर्वितोऽसि सदाशिवम् ॥ कृतश्चतुमुख येन विस्मृतं ऽसितदद्भुत मित्यादि स्कन्दपुराणान्तर्गत केदारखण्डोक्त्या तथा समुत्थाय महाविष्णु भ्रामयित्वा त्रिवापुनः शूलंवक्षस्यथ हस्तौ छित्वायज्ञ द्बहिष्कृत इत्यादिनाबहुशो द्रष्टव्यम् ॥२४॥

॥ भाष्य प्रदीपम् ॥

गर्वितोऽसिइति ॥ विनिर्गतोऽसि शम्भोत्वं रुद्रनामाममात्मजः इतिगर्वेण संयुक्तं वचः श्रुत्वा महेश्वरः कालभैवनामानं पुरुषं प्राहिणोत्तदा ततस्तत्पञ्चमं वक्त्रं भैरवःप्राछिनद्रुषा ततोममारब्रह्माऽसौ कालभैरवहिंसिते तिस्कन्दपुराणान्तर्गत ब्रह्मखण्डोक्त्यासर्वंज्ञेयमिति भावः हस्तौछित्वेति ॥ शिवाज्ञया महाविष्णो गच्छ-त्वंनिधिसन्निधौ जगन्नाथेतिनाम्नावै पूज्योदारुमयम्वपु रित्यवधेयम् ॥३४॥

त्रिशिखोग्निर्य्यतो जात श्चाशित्रनेर्नाशिकान्तथा ॥
एवं यज्ञस्थ देवानां तत्तदङ्गान्व्य घातयत् ॥३५॥

॥ भाष्यम् ॥

ननुं किमेतद्यक्षमित्यादि केनोपनिष द्वृत्तमजानतोग्नेरि दानीं त्रि-शूलेन विनाशोनेत्याह ॥ त्रिशिखइति ॥ तत्रैवसति येचात्रदेवतायज्ञे यद्यदङ्गाभिमांनिन स्तेषामङ्गा निष्कृष्य वीरभद्रो व्यघातय दित्यादिना भारते बहुशः शान्तिपर्व्वणि द्रष्टव्यम ॥३५॥

॥ भाष्य प्रदीपम् ॥

अजानतइति ॥ तद्यथा ॥ यक्षरूपोमहादेवः कोशित्याहानलम्प्रति अग्निर्वा-हमस्मीति यक्षप्रत्याहसोऽपि च तस्मैप्रोवाच भगवान् तवकिंवीर्य्यंइत्यपि सर्वंइदं दहेयंहि यद्भुम्यांसमवस्थितम् इत्याहाग्निस्त्रिणन्तस्मै निधायपरमेश्वरः तद्दहेतीति भगवान्स्मय मानोभ्यभाषत अग्निस्सर्व्वजवेनैव नदग्धुं तृणमास्तिके तिसम्वादेन शिवतत्वमजानतोऽग्नेरित्यर्थः ॥३५॥ सर्वदेवतनुरिति ॥ विष्णुमूर्तिमुपाश्रित्य

तस्मात्सर्वं प्रयत्नेन शिवं यज्ञे प्रपूजयेत् ॥ तेनैव सङ्गतादेवा स्सर्वे पूज्या न संशयः ॥३६॥ शिवोदेवो द्विजो ब्रह्मा क्षत्रियस्तु हरिस्मृतः ॥ इन्द्रो वैश्यस्तथैवान्ये यक्षाद्याः शूद्रजातयः ॥३७॥

॥ भाष्यम् ॥

नन्वतः परं किंकरणीय मस्तीत्युपसंहन्नाह ॥ तस्मादिति ॥ तत्रैवंसति शिवहीना क्रियानैव दानहीना नभूमिपाइत्यादि स्मृत्या तथा ईश्वरस्सर्वभूतानां सर्वदेवतनुर्हरः पूज्यतेसर्वयज्ञेषु सर्वाभ्युदय सिद्धिदेति कूर्म्मस्मृत्यापि च सदाशिवस्य सकलयज्ञादौपूज्यत्वञ्च स्फुटीकृतम् ॥३६॥ एवमिह देवेषु जातिविशेषे णापि सदाशिवस्यसर्वोत्कृष्टत्वं हरे र्ब्रह्मणश्च देवत्वञ्चस्फुटी करिष्यन्नाह ॥ शिवइति ॥ एवन्तर्हि देव देवः शिवः प्रोक्तोनामतश्चार्थतस्तथा ॥ विचारेणाय मेवार्थ स्त्वयमेवा विचारणे त्यादि स्मृत्यापि सर्वोत्कृष्टत्वं सदाशिवस्यैवेति निर्णीतम् ॥३७॥

॥ भाष्य प्रदीपम् ॥

श्रुतिवाक्यानिकानिचित् एवं मूर्त्याभिधानेन द्वारेणैवमुनीश्वराः प्रतिपाद्यो महादेव स्स्थितस्सर्वासुमूर्तिष्विति स्मृत्या सर्व देवोपाशकानां फल दातृत्वं शिवस्यैचेतिबोध्यम् ॥३६॥ जातीति । संकराः सर्वदेवाश्च वृषलस्तु पुरन्दरः पिता महस्तुवैश्यश्च क्षत्रियः परमोहरिः ब्राह्मणो भगवान्रुद्रः सर्वेषामुत्तमोत्तमेतिपाराशरपुराणोक्त्या तथा ॥ ॐ कारोग्निः शिवसोमः पितरश्च प्रजापतिः विष्णुश्चैव रविश्चेति नवमें सर्वदेवता इतिनवसूत्राणां तत्साधकत्व मप्यवधार्य्यम् ॥३७॥ ननु प्रजा-

विप्राणां दैवतंशम्भुः क्षत्रियाणां हरिस्मृतः ॥ वैश्या-
नान्तु तथाचेन्द्रो शूद्राणां यक्षजातयः ॥३८॥

॥ भाष्यम् ॥

नन्वेवंसति जातिविशेणापि कैः कः पूज्य इत्यतोऽव्यवस्थामाह ॥ विप्राणामिति ॥ तत्रैवंसति ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरपियथाविधि तत्तद्देवन्पूजयेतु सर्वैः पूज्यस्सदाशिव इत्यादि स्कान्द वाक्यादप्यन्येषां-सदाशिव साहित्येन पूजनं युक्तमित्यवधार्य्यम् ॥३८॥

॥ भाष्य प्रदीपम् ॥

पतेर पूज्यत्वं पूजंथजं विप्ररूपत इत्यादि वर्त्तर्हि कथं सदाशिवस्य सर्वपूज्यत्व मित्याह ॥ साहित्येनेति शिवेमध्यगते सूर्य्ये गणेश गिरिजाच्युत अग्निनैऋत्य वायव्ये शानेषु परिपूजये दित्यादिस्मृत्या ॥ तथा ॥ अपूज्या यत्र पूज्यन्ते पूजनीयोनपूज्यते त्रीणीतत्र प्रवर्तेत दुर्भिक्षं मरणं भय मित्यादिस्मृत्या च ॥३८॥

गङ्गागर्व्वापहणं कालकूटस्य भक्षणम् ॥ इन्द्रदो
भञ्जनञ्चापि कृतनं शिरसो विधेः ॥३९॥

॥ भाष्यम् ॥

अथ गङ्गायाः विष्णुपादोदकत्वाच्छिवेन शिरसा धृतत्वात्तन्माहा-त्म्यज्ञः शिव एवेति यत्पामराः कथयन्ति तन्नेत्याह गङ्गा गर्वेति ननुच विशाम्यहं हिपातलं श्रोतसो गृह्य शङ्करम् ॥ तस्यापलेपनं ज्ञात्वा क्रुद्धःस भगवान्हरः तिरो भावयितुंचक्रे बुद्धिंत्रिनयनस्तथेति वाल्मीको-

त्त्यात्रिज्ञातव्यम ॥ अनन्य साध्यत्त्वा ज्जगद्रक्षार्थं च कालकूटभक्षणं दक्षयज्ञे इन्द्रस्य वाहुस्तम्भनं विधेः पञ्चम शिरच्छेदन मितिभावः ॥३९॥

॥ भाष्य प्रदीपम् ॥

तथा ब्राह्मणानामधिपतिः शिव एव सनातन स्त्रांत्रयाणांहरिः प्रोक्त सोपिशंकर किंकरेति पाराशरोक्त्याद्रष्टव्यम्—विष्णु पादोद्भत्वेति ॥ तत्रदेवर्षिगन्धर्वा वसुधातल वासिनः भवाङ्गपतितं तोयं पवित्रमितिपस्पृशु इत्यादि वाल्मीकोक्त्या गङ्गा शिवजला न विष्णु जनेति भावः तथा दक्षिण्यधुनेवेश कालकूटो यमद्भूतः येनकेनाप्युपायेण कृष्णच्चे दस्यवारणा मिति शिवरहस्यांक्त्या ज्ञातव्यम् । ३९॥

रक्तपानं हरेस्तद्वत्करोटीश्रग्विधारणम् ॥ एवमादिनी चान्यानि महादेव कृतानि तु ॥४०॥

॥ भाष्यम् ॥

तथा ब्रह्मणस्तुशिरश्छित्वा विष्णोश्चरुधिरेणवै पूरयित्वाथ आगच्छ शीघ्रत्वं याहिभैरवेति स्कन्दपुराणोक्त्या रक्तपानत्वमित्याह ॥ हरेरिति । नारायण सहस्राणां ब्रह्मणामयुतस्यच कृताशिरकरोटीभि रनादिनिधनातथेति स्कन्दपुराणान्तर्गत प्रभासखण्डेक्त्या संहारकाले सर्वेषां मुण्डमालां धृत्वा महास्मशाने नृत्यतिरुद्रः एतादृशान्यपि बहुनि कर्म्माणितेनैव कृतानि तत्समःकोभवेदित्याशयः ॥४०॥

॥ भाष्य प्रदीपम् ॥

नारायणेति ॥ ननु संहर्ताचमहादेव स्तदानन्तानित्र धीन्हरीन ॥ इन्द्रादीनपरान्देवा स्तत्तदण्डेषुस्थितानि दिव्रह्मादि पुराणोक्त्या सर्वेषां नाय कत्वं कस्येवेतिवोध्यम् ॥४०॥

ब्रह्मचारी भवेन्मुण्डी शिखीदाराभिसंग्रहात् ॥ वाण-प्रस्थोजटीप्रोक्तस्तु य्योंन्यासीतु ज्ञानवान् ॥४१॥

॥ भाष्यम् ॥

ननु पञ्चत्रिंशतितत्त्वज्ञो यत्रकुत्र श्रमेनरो मुण्डीजटीशिचापि मुच्यतेनात्रसंशय इत्यत्र कस्तर्हि मुण्डीत्याह ॥ ब्रह्मचारीति ॥ तत्रैवंसति सकलवर्णेषु चौलादिकर्म्मयुक्तत्वेनमुण्डीत्वम् ॥ तथाशास्त्रविधिनादार संग्रहाच्छिखित्वम् ॥ एवंनखलोमादियुक्तत्वेन वाणप्रस्थत्वंजटित्वम् ॥ तथा त्यागः प्रपञ्चभूतस्य चिदात्मत्वावलोकनादितिरित्या तुर्य्यत्वेन सन्यासित्वञ्चेति चतुर्विधेष्वेव वर्णेष्वाश्रमचतुष्टयत्वंविवेक्तव्यम् ॥४१॥

॥ भाष्य प्रदीपम् ॥

विवेक्तव्यमिति ॥ कथमन्यथा गच्छत्वं मन्दमूर्खत्वं शिखानिष्क्रीयतांमठेनाप्यां कूपेपवांनञ्च नम्रोयतां धर्मवर्जित इत्यादि स्कान्दे कौपीनार्थं प्रतिपादनेनोक्तं तथा च अन्नार्थेजिह्म मुद्दिष्टं नमोक्षार्थं मितिस्थिति रितिविष्णु स्मृत्योक्त्या तथा नकर्म्मणाम नारम्भान्नैष्कर्म्यं पुरुषोधनुते न च सन्यसनादेव सिद्धिं समधिगच्छतीतिगीतोक्तथापि च ज्ञातव्यमित्यवधेयम् ॥४१॥

निर्व्याजी स्वीयधर्मज्ञो वेदज्ञस्तत्व पारगः ॥ विरक्तो वेषनिर्मुक्तो षडभिर्विप्रो मुनिर्भवेत् ॥४२॥

॥ भाष्यम् ॥

नन्वस्त्वेवं परंत्वेतावत्प्रबन्धेन सर्व्वतः परत्वं शिवस्यदर्शितन्तथाप्यत्र भूदेवत्व लक्षणं ब्रह्मणयमपि षट्गुणयुक्तत्वेन कीदृशमित्याह ॥

निर्व्याजीति ॥ तत्रताव द्यथान्तस्तथावहि रित्यादिश्रुत्या वहिरन्तर्निष्कपटः एवंयथोक्त स्नानसन्ध्येत्यादिना षट्कर्म्मयुक्तत्वेन स्वीयधर्मज्ञः तथा गायत्र्याद्यर्थ निपुणत्वेनवेदज्ञः एवं शास्त्रसज्जनसम्पर्क इत्याद्यष्टांगयोगयुक्तत्वेन तत्वज्ञत्वेसति वेदपारगः तथा पुत्रदाराप्तवन्धुनां संगमःपान्थसंगम इत्यादिरित्या विरक्तः ॥ एवं मृतानारी दरिद्रैस्तु दूषिताःपापविन्दवः इत्यादिरित्यावेषर्जितश्चेति षडंग योगयुक्तत्वेन विप्रोमननशीलत्वेनमुनिर्भवेदितिहि परमार्थः ॥४२॥

॥ भाष्य प्रदीपम् ॥

षट्कर्म्मयुक्तेति सन्ध्या स्नानं जपोहोमोदेवतानाञ्चपूजनम् आतिथ्यं वैश्ववेवञ्चषट् कर्म्माणिदिनेदिनेति पाराशरस्मृत्योक्त मवधेयम् योगयुक्तत्वेनेति ॥ एवंसति शास्त्रसज्जनसम्पर्को विचारोऽसङ्गभावना समता स्वच्छता सौम्या सप्तधाभूमिकामते त्वधिक सिद्ध भूमिकया ष्टांगयोग युक्तत्वेनेत्य वधार्य्यम् ॥४२॥

स्वकीयं परकीयम्वा शरीरं देवनामयम ॥ न कुर्यात्पादकैय्युक्तं हन्ति तं देवतापरा ॥४३॥

॥ भाष्यम् ॥

तस्मा च्छिवस्थानेशरीरेस्मि न्संस्थितः स्वात्ममायये त्यादिनास्मृत्यन्तरादप्यशिवेनाधर्म कर्मणा नावलिप्त मिदं शोमनम्वपुः कुर्य्यादित्याह । स्वकीयमिति किन्तु शुद्धेनम्मर्णादेवोभूत्वा देन्यजेदिति रीत्यैव वर्तितव्यम् । अन्यथा शरीरशाक्षिणी परादेवता तम्पुरुषं मलिनकर्म्मणाहन्ति नरकाद्यनिष्ठं प्रापयतीतिगत्यर्थोत्र हनिरित्याशयः ॥४३॥

॥ भाष्य प्रदीपम् ॥

अशिवेनेति ॥ तद्यथा शास्त्रवेदेनवर्ज्यानि कर्म्माणित्यशिवविदुरिति स्मृत्या पुनः सर्वेषां सर्वकार्य्येषु विवाहेपुत्र जन्मनि मांगल्येषुच सर्वेषु नधार्य्यं- गोपिचन्दन मितिनिर्णय सिन्ध्वोक्त्यापिती अमंगल कर्म्मणा अशिवंप्राप्नुवन्त्येव कुम्भीपाकादि लक्षणे तिस्मृत्याप्यवगन्तव्यम् ॥४३॥

नक्षतं विग्रहे कुर्यादस्त्रशस्त्र नखादिभिः ॥ यदि कुर्य्यात्तु चक्राद्यैः पतत्येव न संशयः ॥४४॥

॥ भाष्यम् ॥

अतएव आत्मघातन्तुयःकुर्य्या द्रौरवेपतति ध्रुव मित्यादि धर्मप्रब- न्धेप्युक्तमित्याह ॥ नक्षतमिति ॥ तद्यथा ब्राह्मणस्य तनुर्ज्ञेया सर्वदेव समाश्रये त्यादि भूदेवस्तप्तमुद्रान्तु चिन्हंकृत्वा विमूढधी रित्यादि वहुश- स्सर्वशास्त्रार्थ दर्शने चिदमत्र भाष्येपि द्रष्टव्यम् ॥४४॥

॥ भाष्य प्रदीपम् ॥

भूदेवेति ॥ अतएव निष्काशनं कुर्तांकस्य राज्याद्वानगराद्वहिरित्यादि प्रायश्चित्तकदम्बस्मृत्या तथा शिव केशवयोरङ्कांच्छूलचक्रादिकांस्तथा न धार- येन्मतिमा न्वैदिकेवर्त्मनिस्थिते तिस्मृत्यापिच ॥ भूदेवस्तप्तमुद्रान्तु चिन्हकृत्वा- विमूढधी इहजन्मनि दरिद्रस्या त्प्रेतः पश्चाद्भविष्यतीति स्मृत्या ज्ञातव्यम् ॥४४॥ सकलकर्म्मेति ॥ यथोक्तं स्नाने दाने जपे होमे वैश्वदेवे सुरार्चने घृत-

सर्व्वेषामेव भक्तानां शम्भोर्लिङ्गमनुत्तमम् ॥ शितेन भस्मना कार्यं ललाटे वैत्रिपुराड्रकम् ॥४५॥ तस्मात्स-

र्वप्रयत्नेन यथोक्तस्थानपूर्वकम ॥ यथोक्तध्यान संयुक्तो यथोक्तां देवतां स्मरेत् ॥४६॥

॥ भाष्यम ॥

ननुतर्हि स्नानोत्तरं सन्ध्यादौ सर्वैं किंकर्तव्यमस्तीत्याह ॥ सर्वेषामिति ॥ तथाचेह यस्यभाले विभूतिर्नो नांगे रुद्राक्षधारणम् नशम्भोर्भवनेपूजा सविप्रःश्वपचाधिके तिश्रुत्या ये भस्मधारणंत्यक्त्वा सन्ध्यांकुर्वन्तिमानवा स्तानानयन्तुनरके ष्विंतिघोरेषुपतत इत्यादिस्मृत्यन्तराच्च भस्मादि धारणस्यावश्यकत्वं सन्ध्यादि सकलकर्म्मसुदर्शितम ॥४५॥ एवमिह श्रुतयस्मृतयश्चैव युक्तयश्चेश्वरेश्वरम् वदन्ति तद्विरुद्धंयो वदेत्तस्मान्नचाधम इत्यादिस्मृत्यापि सकलसिद्धान्त सिद्धमर्थमुपसंहरन्नाह ॥ तस्मादिति ॥ तत्रैवंसति कुण्डस्थण्डिलसंयुक्त इत्यादिस्थाने पृथ्वीपीठ मित्यादि द्विविधध्यानयुक्तः सन्यथोक्तां तत्तत्स्थानानुगतां देवतांस्मरेदित्यर्थः ॥४६॥

॥ भाष्य प्रदीपम् ॥

त्रिपुंड्रः पूतात्मा मृत्युंजति मानवे तिस्मृत्य व्य वगन्तव्यम् ॥४५॥ कुण्डस्थण्डिलेति ॥ तत्रतावत्कुण्डंनित्यहवनार्थं स्थण्डिलन्तु वैश्वदेवार्थ मित्यर्थः तदुक्तं स्कान्दे तद्यथा गरुड पुराणे त्रिंशेध्याये शिवपूजनविधौगुरुडम्प्रति श्रीकृष्ण वाक्यम् शिवोदाता शिवोभोक्ता शिवःसर्वमिदं जगत् शिवोजयति सर्वत्र यःशिवः सोहमेवहियत्कृतं यत्करिष्यामि तत्सर्वं सुकृतंतत्र त्वंत्राता विश्वनेताच नान्योनाथोऽपिमे शिवेति वाक्यात्तथा नविप्रपादोदककर्दमानि नवेदशास्त्रप्रनिगर्जितानि

स्वाहा स्वधाङ्कारविवर्जितानि दरिद्रयुक्तानिगृहाणितानी त्यादि दालभ्य स्मृत्यासम्वादाद्विवेक्तव्यम् ॥४६॥

मन्त्राणां मन्त्रराजोयं यतश्चास्मिन्निरूपितः ॥ सर्वस्वं सर्वतो भद्रं सर्वतत्वैकदर्शनम् ॥ ४७ ॥ य इदं पठते

॥ भाष्यम् ॥

ननु किमत्र सर्व्वतो निगूढं निरूपितमित्याह मन्त्राणामिति ॥ तथाचास्य सर्वार्थग्राहकत्वेन मन्त्राणां मन्त्रराजोयमित्यादि स्कान्दस्मृत्यापि चषडक्षरस्य मन्त्रराजत्वमववार्यमितिभावः ॥४७॥ अथ वेदाभ्यासेषु-यत्पुण्यं यत्पुण्यंयज्ञकर्म्मणि तत्पुण्यंलभतेमर्त्यो राजमन्त्रस्यपाठत इत्यादिस्कान्दस्मृत्या प्यावश्यकत्वे नात्रफलाधिक्यमपिदर्शयितु

॥ भाष्य प्रदीपम् ॥

निगूढमिति ॥ पञ्चाक्षरश्चगायत्री श्रौतंमन्त्रद्वयंस्मृतं उभयोर्दैवतंयस्मा न्महादेवोमहेश्वरेति स्मृत्या यथा सर्व्वदेवाधि पत्यत्वं शिवस्य तथैव सर्वमन्त्राधिपत्यत्वं षडक्षरस्यैवेतिबोध्यम् ॥ ४७ ॥ फलाधिक्यत्वं ॥ तथाच कैवल्यमार्गदीपोय

नित्यं ध्यायन्नभ्यास तत्परः ॥ एक काल द्विकालम्बा त्रिकालम्वाथमानवः ॥४८॥ इहैवंजन्मनामुक्तःशिवज्ञानी विमुच्यते ॥ लब्ध्वेप्सितान्यथाकामान्कैवल्यञ्चापि यद् ध्रुवम् ॥४९॥

इति श्री शिवरहस्ये षडक्षर मन्त्रराजस्तोत्रं सम्पूर्णम् ॥

॥ भाष्यम् ॥

माह ॥ यइममिति तत्रैवंसति यः पुरुषोयथा कालं यथोक्तनियमेन यथोक्त ध्यानपूर्वकत्वेनच पठेत्तस्यफलाधिक्यं सर्व्वतोगरिष्ठत्वेनविवेक्त व्यमितिभावः ॥४८॥ ननुचात्र किमस्य पाठाच्छ्रवणध्यानतश्च फलाधिक्यमित्याह ॥इहैवेति॥ तथा चेहैव जन्मना ऋणत्रयविमुक्तत्वेन जीवन्मुक्तस्सन्विमुच्यते ऽनावृत्तिलक्षणं कैवल्यं लभत इत्यर्थः ॥तद्यथा॥४९॥

पञ्चाक्षस्य पद्यस्य राजमन्त्राभिधस्यवै ॥
सर्वस्व दर्पणम्भाष्यं रचितंतत्वहेतवे ॥
इति विस्तरादुपरम्पत इति शिवम् ॥

इति श्रीमत्पदवाक्य प्रमाणपारज्ञयोगिवर्य्यविप्रराजेन्द्रविरचितं सर्व्वश्वदर्पणाभिधं पञ्चाक्षरभाष्यं समाप्तम् ॥

॥ भाष्य प्रदीपम् ॥

मविघ्नासिन्धुवाडवः महापातक दावाग्नि स्सोयं मन्त्रः षडक्षरेति स्कान्दस्मृत्या फलाधिक्यमिति भावः ॥४८॥ ननू र्व्वारुकमिव वन्धनान्मृत्योर्मुक्षीये त्यादि श्रुतौ दृष्टान्तमुक्त न्दर्दिहकेनकर्म्मणा कैवल्याधिकारी स्वतएवभवतीत्यभिप्रेत्याह ॥ ऋणत्रयेति ॥ तद्यथा देवोपासनयादेवं पैत्रन्तु पुत्रतोजयेत् ऋष्यादितोजयेदार्षं कैवल्यात्सर्वतोजयेदि त्यादिविस्तरादुपरम्यत इतिशिवम् ॥४९॥

इतिश्रीमद्योगिवर्य्यविप्रराजेन्द्रात्मज पं० कालिकेश्वरदत्त विरचिता भाष्यप्रदीपिका समाप्ता ॥

३ ४ ९ १
अग्निप्रहाङ्कभूसंख्ये वैक्रमीये सुवत्सरे ॥
लिखितं ग्रन्थमेतद्धि कलिकेश्वर शर्म्मणा ॥

श्री गणेशाय नमः ॥ नत्वा सदा शिवं देवं गुरुं शङ्कररूपिणम् ॥ पञ्चाक्षरस्य भाष्यस्य भाषार्थं क्रियते मया ॥ १ ॥

दोहा

श्री सदाशिवदेवको योगिराज शिरनाय।
पञ्चाक्षर अस्तोत्रका भाषा करों बनाय ॥

(ॐनमः शिवाय) यह मन्त्र सात कड़ोर जो मुक्ति देनेवाले शैवमन्त्र हैं उन सब मन्त्रोंसे श्रेष्ठ है जैसे सव देवोंमें महादेव श्रेष्ठ हैं वैसे ही सव मन्त्रोंमें यह मन्त्र श्रेष्ठ है चलते फिरते खाते सोते बैठते उठते सदा जो इस मन्त्रका अभ्यास करते हैं उनको और कर्म्म करें या नहीं करें कुछ उससे विशेष फल नहीं होता ॥१॥

जिसने इस मन्त्रका अभ्यास अपने हृदयमें स्थिर कर लिया है वह सब सुन चुका और सब कर चुका कोई कर्म्म उसको करना बाकी नहीं है ॥२॥

जितना शिवज्ञान है और विद्या आहार है सब इस षडक्षर मन्त्रके सोलभागके एक भागका वरावरी नहीं कर सकते जैसे वटके वीजमें महावट वृक्ष रहता है वैसे ही इस मन्त्रमें सब विद्या और सब ज्ञान भरा हुआ है ॥३॥

आगे इस मन्त्रका प्रति अक्षरका ऋषिछन्द देवताका कथ करते हैं क्योंकि बिना ऋषिछन्द देवताकीर्तनके जप करनेसे पूर्ण फल नहीं

होता है ॐकारका उदात्तस्वर ब्रह्म ऋषि (प्रवर्तक) श्वेतवर्ण अनुष्टुप् तथा गायत्री छन्द परमात्मा शिवदेवता हैं परमात्मा शब्द शिवका वाच है केनोपनिषदकी श्रुति कहती है कि शिव एक समाधिमें प्राप्त होनेवाला आत्मा जानवे योग्य है और शाण्डिल्योपनिषदकि श्रुति कहती है कि आकाशतव्यापक सूक्ष्मशिव अमृत ब्रह्म आत्मा है तथा गीतामें भी श्रीकृष्णचन्द्रने अर्जुनके प्रति कहा है कि उत्तम पुरुष हमसे अन्य परमात्मा है जो तीनों लोकमें व्यापक हो कर सबका पालन करता है ॥४॥

नकारका पीतवर्ण पुर्वमुख इन्द्रदेवता गात्री छन्द गौतमऋषि हैं ऋषिका अर्थ है कि जिससे लोकमें विस्तृत हो ॥५॥

म कारका कृष्णवर्ण दक्षिण मुख अनुष्ठुप और गायत्रीछन्द रुद्रदेवता हैं रुद्र उनका नाम इस कारणसे है कि उनके भक्तिसे विमुखजनोंको रुलाते है ॥६॥

शिकारका धूम्रवर्ण पश्चिममुख विश्वामित्र ऋषित्रिष्टुप छन्द विष्णुदेवता है जो कुछ इस जगतमें देखने सुननेमें आता है सो सब विष्णु हैं और जो वेदोंके आदिमें कहागया है जिसको वेदान्त ब्रह्म आत्मा परमात्मा नामसे कहता है वही महेश्वर शिव हैं ॥७॥

वाकारका सुवर्णके सदृशवर्ण उत्तरमुख ब्रह्मादेवता बृहतीछन्द अङ्गिराऋषि हैं सदाशिवके दक्षिण अङ्गसे ब्रह्मा वामअङ्गसे विष्णु अग्रभागसे रुद्र तीनोंको उत्पन्न कर स्पष्टिपालन संहारका आज्ञा दिये ॥८॥

य कारका लालवर्ण उर्ध्वमुख विराट्छन्द कार्तिकेय देवता भरद्वाजऋषि हैं जो ईशान नामकी मूर्ति पूर्वाभिमुखा सर्वश्रेष्ठ प्रकृति (माया) का भोक्ता क्षेत्रज्ञमें रहती है। और जो तत्पुष नामवाली दूसरी मूर्ति है गुणोंके आश्रयमें उत्तर मुख होकर मायामें स्थित रहती और जो अघोर नामिका तीसरी मूर्ति है सो दक्षिण मुख होकर बुद्धिमें रहती है और जो वामदेव नामवाली चौथी मूर्ति है पश्चिम मुख होकर अहंकारमें रहती है और जो सद्योजात नामवाली पाँचवीं मूर्ति उर्ध्वमुख हो कर मनमे रहती है ॥९॥

न्यासके बिना मन्त्र जपका पूर्णफल नहीं होता है अतः न्यासका भेद आगे कहते हैं न्यास तीन प्रकारका है उत्पत्ति[१] स्थिति[२] संहृति[३] ब्रह्मचारीको वेद वेदाङ्ग आदि अनेक विद्यावोंको अपने हृदयमें उत्पन्न करना है अतः उनको उत्पत्ति न्यास करना—और गृहस्थको स्थिर हो कर पुत्रपौत्रादिकोंका रक्षा करना अतः उनके लिये स्थिति न्यास कहा गया और सब कर्मोंको नाशकर त्यागी हो कर रहनेसे यतीके लिये संहृति न्यास है ॥१०॥ ॥११॥

मस्तकसे आरम्भकर पैरतक जो खतम हो उसको उत्पत्ति न्यास कहते हैं और करन्यासमें दक्षिण हाथके अंगुष्ठसे जो आरम्भ हो और वाँम अङ्गुष्ठतक खतम हो उसको उत्पत्ति न्यास कहते हैं ब्रह्मचारीके लिये हैं ॥

और पैरसे आरम्भ हो मस्तक तक जो खतम हो उसको संहृति

न्यास कहते हैं वांम अगुष्ठसे आरम्भ कर दक्षिण अंगुष्ठतक खतम करना संहृति है यतीके लिये ॥

हृदय मुख गदनसे जो आरम्भ किया जाय सो स्थिन्यास है और कन्यासमें दोनों हाथके अंगुष्ठसे आरम्भकर कनिष्ठिका तक जो न्यास है सो स्थिति न्यास गृहस्थोंके लिथे अति आनन्ददायक है

॥१२॥ ॥१३॥ ॥१४॥ ॥१५॥

(ॐनमः शिवाय) इस मन्त्रसे सब अङ्गोंको छूना यह देह न्यास तीनोंके लिये एक ही तरह का है ॥१६॥

प्रत्यक्षका ऋषिछन्द देवताका कथन करके आगे समस्त मन्त्रका ऋषिछन्द देवता कहते हैं मन्त्र पाँच अक्षरका है आदिमें ॐकार लगानेसे छः अक्षरका होता है।

ॐनमःशिवाय

इस मन्त्रका ब्रह्मा ऋषि हैं पङ्क्ती छन्द है महादेव देवता हैं ज्ञान प्राप्ति प्रयोजन है ॥१७॥

संसाररूपी दावानलसे तप्त दीन होकर अर्थ धर्म काम मोक्षके प्राप्तिकेतु मैं नमस्कार करता हूँ ॥१८॥

और एकर्थ इस मन्त्रका यह है वहिर्मात्रसे अङ्ग परिवारके साथ पूजन करके मैं यह चाहता हूँ कि शिव अर्थात् कल्यान रुप मैं हो जाउँ ॥१९॥

और फिर भी एक अर्थ यह है कि यह जीव केवल शिव है मन

बुद्धि चित्त अहंकारके बन्धनमें पड़कर जीव सुख दुःखका भोक्ता होता है इस बन्धनसे छूटकर मैं शिवरूप हो जाऊँ ॥२०॥

पुनः एक अर्थ यह है कि वाकारका ब्रह्मा देवता हैं अतः सृष्टिकर्ता वाकार है और शिकारका विष्णु देवता हैं अतः पालनकर्ता हैं मकारका रुद्र देवता हैं अतः संहारकर्ता है नकारका इन्द्रदेवता होनेसे राज्यकर्ता है यकारका स्कन्ददेवता होनेसे सेनापति होकर युद्धकर्ता है वही षड़क्षर मन्त्र वाच्यदेव सदाशिव सब रूप होकर सब कार्य करते हैं उनको मैं नमस्कार करता हूँ ॥२१-२२॥

पुराण अठारहोंका निष्ठा (भक्ति) काष्ठा परत्व वर्णन शिवमें है निग्रह (क्रोधसे दण्ड) अनुग्रह (तपसे वरदान) दोनों रूपसे उन्हींका परत्व है पुराण अठारह उपपुराण अठारह महाभारत अठारह पर्व भगवद्गीता अठारह अध्याय विद्या अठारह यह सब अठारह ही क्यों हुए तो लिखा है कि पाँचसे शिवका पाँचो मुख दशसें दशो बाहु दोसे पैर एकसे हृदय शिवरूप सब है ॥२३॥

राम रावणका युद्ध शिवके प्रभावसे है कैसे कि रावणको तपसे प्रसन्न हो कर वर दिये और जानकी हरणके वाद अगस्त्य ऋषिके उपदेशसे राम शिवका आराधन तप किये दोनोंको वर देकर लड़ा दिये शिव देखनेवाला हैं अतः शिवका लीला है राम रावणका नहीं है जैसे दो पहलवान लड़ते हैं सब लोग देखते हैं तो पहलवानोंका लीला नहीं है देखनेवालोंका है ॥२४॥

वेदसे भी शिव ही पूज्य हैं उनके पूजनके वाद ही और देव पूज्य हैं पृथ्वी अर्घा हैं आकाश जो लिङ्गाकार है सो शिवह मेघ जलधारा है तारागण पुष्प हैं इस स्कन्दपुराणके कथनसे सर्वमय वही शिव हैं और दक्ष यज्ञमें प्रथम पूजा विष्णुका हुआ शिवका पूजा नहीं हुआ तो सब देवोंका अंगभंग हुआ इस भारतके उक्तिसे भी शिव प्रथम पूज्य हैं २५

सब जीव शिवका अंश हैं और (सर्वं शिवमयं जगत) सब जगत शिवमय है इस भावसे तो सब पूज्य हैं परन्तु व्यवहारिक दशामें सब द्विपदमें विष्णु श्रेष्ठ हैं और उनके वाद प्रजापति उनके वाद इन्द्र आदि देवता वाद उनके यक्ष गन्धर्वादि वाद मनुष्य मनुष्योंमें ब्राह्मण वाद क्षत्रि वैश्य शूद्रादि और सबसे श्रेष्ठ शिव हैं क्योंकि जो इन्द्रको सहस्राक्ष बनायें विष्णुको कमलाक्ष बनाये ॥२६-२७॥

ब्रह्मा आदि सृष्टिमें पाँचमुखका हुए शिवसे अभिमान किये तो शिवने भैरवको आज्ञा दिये कि पाँचवा शिरका काटलो चतुर्मुख हो गये कामदेवने सब देवोंके सदृश शिवको समझकर आया शिवके तृतीय नेत्रसे भयंकर अग्नि निकलकर भस्मकर अङ्गरहित कर दिये भस्मासुर उन्हींके वरदानसे शिरपर हाथ रखते ही भस्म हो गया फिर दूसरोंकी कौन गीनती है ॥२८॥

बहुत लोग कहते हैं कि ब्रह्माके ललाटसे शिव हुए अतः उनका पुत्र हुए सो नहीं ब्रह्माको सृष्टि करनेकी शक्ति देनेके लिये ललाटसे

आविर्भाव हुए और सब लोग शिवका ललाटहीमें ध्यान कर इसलिए नहीं तो खम्भासे नृसिंह हुये तो क्या खम्भा नृसिंहका पिता कहा जा सकता है ? कदापि नहीं जैसे वामनावतारका नख ब्रह्माण्ड कटाहमें लगा वहाँसे गंगा निकली इससे उनका चरणामृत नहीं हुई गंगा पहले ही से रही ॥२९॥

सब देव हैं तो उनका नाम महादेव देव देव देवोंका भी देवता है जैसे स्कन्दपुराणमें लिखा है कि विष्णु भगवान शिवके लिये अर्जुनके गुप्त वनवासके समय शूकर रूप हुये सर्वस्ववर दानप्राप्त करनेके लिये नन्दीरूप हुये हजार कमलोंसे नित्य शिवपूजनका नियम किये एक कमल घट जानेपर अपना नेत्र चढ़ाकर अर्चक हुये त्रिपुर वधके समय वाण हुये मोहिनी अवतार धारणकर सखी भाव हुये नित्य प्रदोषकालमें मृदंग बजाते हैं शिवके ऊपर अपना नेत्र चढ़ाये तबसे कमलाक्ष हुये शिवके आधा भगवती भगवतीके आधा विष्णु शिवके अर्द्धाङ्ग शरीरका भागी हुये और जजुर्वेदमें लिखा है कि सृष्टिके आदिमें ब्रह्माको वेद दिये अतः शिवके भीतर ही सब देव हैं ॥३०॥

भगवतीका वाहन सिंह शिवका वाहन वृषभ भूषण सर्प कार्तिकेयका वाहन मयूर गणेशका वाहन मूँस यह सब परस्पर विरोधी होते हुये भी उनके भयसे कम्पित रहते हैं जैसे वेदकी श्रुति कहती है जिनके भयसे वायु बहते हैं सूर्य उदय लेते हैं अग्नि वरते हैं

मृत्यु मारते हैं इन्द्र राज्य करते हैं ऐसे महादेवको जो स्मरण करते हैं सो घोर पापसे छूट जाते हैं ॥३१॥

इसी प्रकार ब्रह्मा विष्णु भी उन्हींके आज्ञासे सृष्टि पालन करते हैं दूसरोंको क्या कहना है ब्रह्मवैवर्तमें लिखा है कि एक समय ब्रह्मा विष्णु दोनों शिवके पास महाकैलाशमे जाकर अपने-अपने कामसे इस्थिपा दिये वाद उन दोनोंकी बड़ी दुर्दशा हुई किसी तरहसे फिर उनके आज्ञासे अपने कामपर आये तो फिर दूसरोंका क्या कहना है ॥३२॥

शिवको छोड़कर दक्षने यज्ञ किया शान्तिपर्व महाभारतमें लिखा है कि जब शिवके क्रोधसे वीरभद्र निकलकर दक्षका यज्ञ नाश करनेको आये तब अग्नि सूर्य चन्द्रमा आदि सब ग्रह भाग चले सूर्यका दाँत तोड़ लिये अग्निका हाथ काटकर जिभ उखाड़ लिये विष्णु भगवानका सुदर्शनचक्र स्तम्भन कर वाणोंसे वेधन कर दिये और सब देवोंका एक एक अङ्ग भंग किये दक्षका शिर तथा विष्णु भगवानका दोनों हाथ काट लिये ॥३३॥

स्कन्दपुराणके केदारखण्ड और ब्रह्मखण्डमें लिखा है कि एक समय ब्रह्मा पाँच मुखका हुए और शिवसे गर्व किये शिवने भैरवको आज्ञा दिया कि पाँचवाँ शिर काट लो और विष्णुका हाथ काटकर घुमा कर फेक दिये जो समुद्रके किनारे जगन्नाथ नामसे विख्यात हैं और सूर्यका दाँत चन्द्रमाका नेत्र काट लिये ॥३४॥

और अग्नि तीन शिरका हुए अश्विनी कुमारका नासिका काट लिये जिस जिस अङ्गका अभिमानी जो देवता रहे उन सबोंका वह अङ्ग काट लिये केनोपनिषद्में लिखा है कि एक समय सब देवता शिवको छोड़कर स्वतन्त्र होना चाहते रहे शिव यक्षरूपसे आविर्भाव हुये अग्नि वायु उनके समीप भेजे गये उन्होंने दोनोंके आगे एक एक तृण रख दिया और कहा कि हे अग्नि ! भस्म करो हे वायु ! तुम ग्रहण करो अग्नि नहीं जला सके वायु तृणको नहीं हिला सके लज्जित हो लौट आये वाद इन्द्र गये तो अन्तर्ध्यान हो गये आकाशमें हिमवानके पुत्रीको देख पूछते भये कि कौन यक्ष है भगवतीने कहा कि यही ब्रह्म परमात्मा है इन्हींके रहते तुम सब अपना काम कर सकते हो ॥३५॥

विष्णु मूर्ति द्वारा ब्रह्म मूर्ति द्वारा अग्नि मूर्ति द्वारा तत्तदेव मूर्ति द्वारा वेदशास्त्रमें प्रतिपादन महादेवहीका है सब देवरूप होकर वही ग्रहण करते हैं और फल देते हैं अतः सब कर्मोंमें प्रथम उन्हींका पूजन करना चाहिये वाद अङ्ग परीवारमें और देव पूज्य है ॥३६॥

शिव देव हैं ब्रह्मा द्विज हैं हरि क्षत्री हैं इन्द्र वैश्य हैं यक्ष यम शूद्र हैं देव देव शिव है नामसे अर्थसे भी हैं और पराशर उपपुराणमें लिखा है कि सब देवता वर्णसंकर हैं इन्द्र शूद्र है ब्रह्मा वैश्य हैं हरि क्षत्रिय है भगवान रूद्र ब्राह्मण हैं उनमें ब्रह्मगत्व ब्राह्मण कुलमें जन्म लेनेसे नहीं है ब्रह्मरूप होनेसे है और यज्ञोपवीतके नवसुत्रोंका

नव देवता उन्हींके साधक हैं अतः सर्वश्रेष्ठ शिव हैं ॥३७॥

ब्राह्मणका देवता शिव क्षत्रीका विष्णु वैश्यका इन्द्र शूद्रोंका यक्षादि देवता हैं और सब देव भक्तोंको शिव पूज्य हैं शिवको मध्यमें और अग्नि नैऋत्य वायव्य ईशानमें सूर्य गणेश गीरीजा विष्णु यथाक्रमसे पूज्य हैं क्योंकि अपूज्यका जहाँ पूजा हो और पूज्यका पूजा न हो तहाँ दुर्भिक्ष मरण भय उपस्थित होता है और पराशर उपपुराणमें लिखा है कि ब्राह्मणोंका अधिपति शिव हैं क्षत्रियोंका विष्णु सो विष्णु भी शिवका किंकर हैं इत्यादि प्रमाणोंसे सब देव-भक्तोंको प्रथम उपास्यदेव शिव हैं ॥३८॥

गङ्गाका गर्व हरण किये कालकूटसे वेवदानव मनुष्योंका रक्षा किये दक्ष यज्ञमें इन्द्रका बाहुस्तम्भन किये ब्रह्माका पंचम शिर काट लिये फिर उनके बराबर कौन हो सकता है बहुत लोग शास्त्रतत्वसे अनभिज्ञ कहते हैं कि गंगा विष्णु पादोदकी है शिवने चरणामृत समझकर धारण किया परन्तु गंगा जब अभिमान करके वहाँसे चलि तब शिवको क्रोध हुआ और उनको आकाशहीमें रोक देनेका विचार किये परन्तु किसी तरहसे शिवके जटातक पहुँची कई हजार वर्ष उसीमें रह गई वाद भगीरथके बहुत प्रार्थनासे शिव प्रसन्न हो जटासे बाहर किये सात बुन्द निकली तीन. शिवजला गंगा पूरवको गई और तीन पछिमको गई और एक भगीरथके रथके पीछे पीछे चल कर पृथ्वीमें पहुँची सब पृथ्वीतलवासी स्नान मार्जनके लिये चले

यह समझकर शिवके अंगसे गिरा हुआ जल पवित्र है इस वाल्मीकीके वाक्यसे गंगा शिवजला हुई विष्णुजला हुई ॥३९॥

और ब्रह्माके कपालमें विष्णुके रुधिरसे भर लावो ऐसा भैरोको शिवने आज्ञा दिया स्कन्दपुराणके प्रभास खण्डमें लिखा है कि अन्तकालमें रुद्रके वक्त्रसे वारह सूर्य निकलक सचराचर स्वर्ग पातालको भस्म कर देते हैं सब देवोंका मुण्डमाला बनाकर महा स्मशानमें एक रूद्र ही रह जाते हैं इत्यादि ऐसे ऐसे बहुत काम शिवने किया है जो और देवोंसे असाध्य है फिर उनके बराबर कौन हो सकता है इत्यादि ॥४०॥

गृहस्थाश्रम सब आश्रमोंका मूल है और इसीके भीतर चारो आश्रम है प्रथम मुण्डन संस्कार होनेसे मुण्डी वाद विहाकर गृहस्थ वाद पुत्र पौत्रादि हो जानेपर जटी होकर वानप्रस्थ वाद उसके सब संकल्प नष्ट हो जानेपर ज्ञानी (संन्यासी सब काम्यकर्मोंका न्यास अर्थात् त्यागको संन्यास कहते हैं काषाय धारण अन्नके लिये है मुक्तिके लिये नहीं ऐसा विष्णुस्मृतिका और गीताका वाक्य है और गीतामें भी काम्यकर्मोंका न्यास (त्याग) को ही संन्यास कहा है ॥४१॥

(निर्व्याजी)१ वाहर भीतर कपटरहित होना (स्वीयधर्मज्ञः)२ सन्ध्या स्नान१ जप२ होम३ देवपूजन४ आतिथ्य५ वलिवैश्यदेव६ षटकर्मयुक्त होना (वेदज्ञः) वेदका गूढ़ार्थ जानकर गायत्रीका अर्थ

जानना (तत्वपारग)४ अष्टांग योग युक्त होकर ज्ञानप्राप्त करना (विरक्तः)५ पुत्र स्त्री आदि परीवारमें रहते हुए उनसे विरक्त रहना (वेषनिर्मुक्तः) ६ वेषाभिमानी नहीं होना इन छः कर्मोसे ब्राह्मण मुनीश्वर हो जाता है ॥४२॥

अपना या दूसरेका शरीर देवतामय है इस शरीरमें तत्तदिन्द्रियो का साक्षी देवता रहते हैं अतः इसको शास्त्र वेदोक्त वर्जित कर्म्मोंमें नहीं ले जाना और ले जानेसे इस देहका साक्षी देवता क्रोध करके अशिव (अमङ्गल) रूप कुम्भीपाकादि नरक प्राप्त करते हैं गोपीचन्दनसे उर्द्ध पुड्रादि धारण अमङ्गल बेष है निर्णयसिंधु धर्म-शास्त्रमें लिखा है कि बिबाह पुत्रजन्म आदि मङ्गल कार्य्योंमें गोपीचन्दन नहीं धारण करना क्योंकि श्रीकृष्णचन्द्रके देह सम्पात होनेपर आठ पट्टरानी उनके साथ सती हुई हैं जहाँ का मृत्तिका लगाकर वह सती हुई हैं वही गोपीपचन्दन हुआ है विस्तारसे इस विषयको देखना हो तो हमारा संग्रह किया हुआ सिद्धान्तरत्नाकरका प्रथम खण्ड देखिये ॥४३॥

इस देहको सस्त्र अस्त्र नख आदिसे नहीं काटना और त्रिशूल चक्रादि चिह्नोंसे अङ्कित नहीं करना यदि करते तो पतित हो जाता है प्रायश्चित कर्म्म तथा निर्णय सिंधु धर्म शास्त्रोंमें बर्जित किया है जो चक्र त्रिशूलादिसे अङ्कित हों उनको राजाका धर्म है कि अपने राज्यसे अथवा ग्रामसे निकाल दे शिवका चिह्न त्रिशूल विष्णुका चिह्न चक्र

गणेशका चिह्न अंकुश सूर्यका धन्वाबान शक्तिका बरछी आदि धारण करना अवैदिक मार्ग है वेदमें किसी जगह इसका विधान नहीं है कलिके पापी ब्राह्मणादि वर्ण त्रिशूल चक्रसे अंकित होंगे उस पापसे दरिद्र और मरने पर प्रेत होंगे जो लोग वैदिक प्रमाण देते हैं कि (अतप्तनूर्नत दामोहणते) ऋगवेदकी श्रुति है इसका व्यासादि महर्षियोंने इस प्रकार अर्थ किया है कृच्छ्र चान्द्रायणादि व्रतोंसे जो तप्ततनु नहीं हुये सो स्वर्गको नहीं जाते चक्रादिकोंसे जो दग्ध बाहू होते हैं सो दग्धतनु हैं तप्ततनू नहीं हैं इत्यादि ॥४४॥

सब देव भक्तोंको वैदिक मार्गसे उपासना द्वारा स्नानकर सन्ध्याके समय विभूति धारणा करना चाहिये पूर्वकालके जितने वैष्णव ऋषि हुये जैसे नारद, पर्वत, ध्रुव, प्रह्लाद, भृगु, आदि सो सबोंने बिभूति, रुद्राक्ष, धारण कर बिष्णुभगवानका उपासना किये हैं उपनिषद् बेद पुराणोंमें भी लिखा है कि जिसके ललाटमें बिभूति न हो अङ्गोमें रुद्राक्षमाला न हो गृहमें शिवका पूजा न हो वह चाण्डालसे भी अधिक निन्दनीय है और यमका वचन अपने दूतोंके प्रति है कि जो बिभूति धारण किये बिना सन्ध्या आदि कर्म्म करते हों उनको यत्न पूर्वक नरकमें ले आना-इत्यादि ॥४५॥

अनन्य मनसे शिवका पूजन करके प्रार्थना करना कि एक शिव ही दाता, भोक्ता, और सब जगतमय हैं जहां देखिये सब शिव हैं जो शिव हैं वही मैं हूँ जो कुछ सुकृत दुःकृत किये हैं या करते

हैं और करेंगें सो सब शिवमें अर्पण कर देना और आप ही रक्ष है आपसे अन्य दूसरा नहीं है इस गरुड़ पुराणके बचनसे सब देव भक्तोंको शिवका आराधन करना परमावश्यक है ॥४६॥

सब मन्त्रोंका राजा यह मन्त्रराज षड़क्षर मन्त्र है क्योंकि इसमें बीज रूपसे सब स्थित है इस मन्त्र राजस्तोत्रका भाष्य सर्व तत्वैक दर्शन नामक श्रीमद्योगिवर्य्य विप्रराजेन्द्र स्वामिजीने बनाया ॥४७॥

शिव ध्यानयुक्त हो कर जो इस स्तोत्रका अर्थ ज्ञान पूर्बक तीनों काल अथवा एक काल भी पाठ करेंगें सो इसी जन्मसे तीनों ऋण (देवऋण[1]) (पितृऋण[2]) (ऋषिऋण) से मुक्त हो कर कैवल्य ज्ञानको प्राप्त कर शिवरूप हो कर मुक्त हो जायगें ॥४८॥ ॥४९॥

इति श्री भाषाटीका समाप्त

॥ नित्यं शुद्धं निराभासं निराकारं निरञ्जनम् ॥
॥ नित्यबोधं चिदानन्दं गुरुं ब्रह्मनमाम्यहम् ॥

श्री कालिकेशस्य गुरोर्गिरातो बिनिर्गतोयो बहुशोधितस्य । अयोमये यन्त्रवरे सुयत्नात्सु यन्त्र्यतंधर्म धुरन्धरेण ॥ सुरेन्द्र नारायणसिंह जेन । श्री जीवनारायण नामकेन ॥ प्रकाशितं द्रब्य ब्ययेन सर्वं लोकोपकारायथ कीर्तिहेतवे ॥

वेदा[४] ङ्क[९] ग्रह[९] भू[१] संख्ये वैक्रमीये सुवत्सरे ।
कलिकत्ता नगर्य्यांच प्रवासी प्रेस मुद्रितम् ।

—०—

मूल चतुर्थखण्डका शुद्धिपत्र

अशुद्ध	शुद्ध	पृ०	पं०
दिग्वसा	दिग्वासा	३	२
दाक्कृत्	दाह्कृत्	५	३
मेव्वापि	मेघाख्यं	५	६
श्यान्येपि	श्चान्येपि	७	५
याथार्य्यं	याथार्थ्यं	११	६
नोपाल	नेपाल	१६	८
मुनश्च	मुनयश्च	२५	५
त्वाह्लिङ्ग-भ्यर्य्य	त्वाल्लिंगे-भ्यर्च्य	२७	६
स्यिङ्ग	लिङ्ग	२८	९
महेश्वरम्	महेश्वरः	४२	५
ज्ञेयः	धेयः	१२१	८
योग्रं	चोग्रं	१३२	५
सहा	समहा	१५०	२
बर्णा	बर्षाया	१५१	२
कुबेरे	कुबेरेण	१५७	३

टीकाका शुद्धिपत्र

अशुद्ध	शुद्ध	पृ०	पं०
इन्द्र	नइन्द्र	७	४
व्यपक	व्यापक	६	८
कौषेर	कौवेर	३२	६
तोपा	तोया	११३	४
भील	भलि	११४	२
जचल	अचल	११४	१०
जगघोने	जगद्योने	११८	१
वाशुवा	वाशुदेवा	१४६	४
वृत्रकी	वृत्रको	१५१	७
अदितने	अदितीने	१५४	६
लोककी	लोकको	१६२	३
भवान	भगवान	१६७	२
होनेसे	होनेके	१६८	१
नामस	नामसे	१७३	७

पुस्तक मिलनेका पता—

पं० कालिकेश्वर दत्त,

राज्य डुमरांव, जिला आरा

दूसरा पता—

श्री बाबू जीवेन्द्रनारायण राय देवश

लालगोला राज्य, जिला—मसुदाबाद